THE VĪRATARAṄGIṆĪ

OF

MM. CITRADHARA OF MITHILĀ

[Published with the financial assistance from the Ministry of Education, Govt. of India]

CRITICALLY EDITED BY

DR TRILOKANĀTHA JHĀ
M. A., PH. D.,

Department of Sanskrit,
Chandradhari Mithila College, Darbhanga

DARBHANGA
1965

THE VĪRATARAṄGIṆĪ

OF

MM. CITRADHARA OF MITHILĀ

[Published with the financial assistance from the Ministry of Education, Govt. of India]

CRITICALLY EDITED BY

DR TRILOKANĀTHA JHĀ
M. A , PH. D.,

Department of Sanskrit,
Chandradhari Mithila College, Darbhanga

DARBHANGA

1965

Published by :

Dr Trilokanātha Jhā,
M. A., Ph. D.,

Department of Sanskrit,
C. M. College,
Darbhanga (BIHAR)

Copyright reserved

Price : Rs. Three Only

Printed by :

Tara Printing Works, Varanasi

वीरतरङ्गिणी

(मैथिलमहामहोपाध्यायचित्रधरप्रणीता)

दरभङ्गास्थचन्द्रधारिमिथिलामहाविद्यालयस्य संस्कृतविभागीयाध्यापकेन

झोपाह्व-(डाक्टर)-त्रिलोकनाथशर्मणा

संशोध्य सम्पादिता

१९६५ तमे खृष्टाब्दे दरभङ्गानगर्यां केन्द्रीयशिक्षामन्त्रालयद्रव्यसाहाय्येन

प्रकाशिता

प्रकाशकः —

डाक्टर त्रिलोकनाथझा, एम्. ए., पी-एच्.डी.,
संस्कृतविभागीयाध्यापकः,
चन्द्रधारिमिथिलामहाविद्यालयः,
दरभङ्गा (विहार)

प्रकाशनाधिकारः स्वायत्तीकृतः

मूल्यम् ३) रौप्यकाणि

मुद्रकः —

तारा यन्त्रालयः, वाराणसी ।

To
Our respected father
Who is now no more

PREFACE

Some years back Śrī Ambikānātha Miśra, B. A. (Hons), Dip.-in-Ed. of village Lālagañja (P. O. Lohana Road, District Darbhanga) was kind enough to hand over a bound copy ($10\frac{1}{2}'' \times 8\frac{3}{4}''$) written in Maithilī characters to us for our perusal and in it we discovered *inter alia* the *Śṛṅgārasāriṇī* and *Vīrataraṅgiṇī* of Mahāmahopādhyāya Citradhara. Notices of these two works had been made earlier by Jayaswal[1], Singh[2] and Miśra[3] but the last two of them, probably misled by analogy, wrongly named the *Vīrataraṅgiṇī* also as *Vīrasāriṇī*. An examination of the works aroused in us an unstinted praise for their merit which is manifold in character. Apart from their poetic beauty evinced in the illustrative verses and their critical insight shown in the analysis of the views of the preceding theorists of poetry and the author's emendations thereon, these works of Mm. Citradhara also serve as a valuable source of information for the world of literatures. The *Vīrataraṅgiṇī* gives citations from two unknown works of the author, viz., *Vināyakastava* and *Rājastutipadya*. Besides, the *Śṛṅgārasāriṇī* quotes from *Alasamodinī*[4], a hitherto unknown treatise on Sanskrit poetics.

---

1. K. P. Jayaswal in Descriptive Catalogue of Manuscripts in Mithila-Vol.-II-pp. 69-71 (Nos 51, 51A) and p. 65 (No. 46), Patna, 1933
2. S. N. Singh in History of Tirhut-p. 124, The Baptist Mission Press, Calcutta 1922.
3. Umesha Mishra in his introduction (p. 7) to the *Vidyākara-sahasraka*, an anthology of Sanskrit verses compiled by Vidyākara Miśra, Allahabad University Publication, Allahabad, 1942.
4. Fortunately the present writer could discover and publish it for the first time. For particulars *vide* his paper entitled "*Alasamodinī* of Gaṅgānanda Kavīndra" published in the Vishweshwaranand Indological Journal, vol. II, pt. II (September 1964).

We wanted to publish a critical edition of these two unpublished Sanskrit texts. We collected available manuscripts, collated them and prepared a copy for the press. In the meantime we approached the Ministry of Education, Government of India for financial assistance for the publication and we are grateful to the authorities for complying with our request.

In fine, let us thank the proprietors of the Tara Printing Works, Varanasi, but for whose co-operation the printing would have been much delayed.

TRILOKANĀTHA JHĀ

March 8, 1965

CONTENTS

Preface ... ... pp. VII-VIII

Introduction ... ... pp. XI-XVII

Text ... ... pp. 1-40

An alphabetical index of verses found in the *Vīrataraṅgiṇī* ... ... pp. 41-42

An alphabetical list of books and authors cited or referred to by Citradhara in his *Vīrataraṅgiṇī* ... ... pp. 43

INTRODUCTION

The history of Mithilā, C. J. Stevenson Moore once observed, "does not centre round valiant feats of arms, but round courts engrossed in luxuriant enjoyment of literature and learning".[1] Mithilā, for centuries together, has been a synonym of the Land of Sarasvatī, the Goddess of Learning. Philosophy and literature have been the chief products of this soil. And it is worthy of note that Mithilā has seen philosophers with a unique fascination for poetry and drama. There have been philosopher-poets—**MM. Śaṅkara, MM. Gokulanātha and Sarvatantrasvatantra Dharmadatta,** to name only the three representatives of their ages. Besides, there have also been men of letters with poetry and poetics as their primary preoccupation, to wit, **Kavirāja Bhānudatta, Kavīndra Gaṅgānanda, Kaviśekhara Badarīnātha** and others. Mahāmahopādhyāya Citradhara, our present author, also belongs to this second category of litterateurs.

THREE CITRADHARAS

While re-constructing the literary history of Mithilā we come across at least three figures bearing the name **Citradhara.** They are :

(1) Citradhara, the fifteenth century commentator on the *Anargharāghava* of Murāri. This Citradhara flourished during the reign of King Bhairava Simha of Mithilā (c. 1480—c. 1515 A.D.[2]).

1. Muzaffarpur Survey and Settlement Report.
2. Thakur : History of Mithilā—p. 334, Mithila Research Institute, Darbhanga.

(2) Citradhara, the early eighteenth century writer on poetics of village Mangaraunī.

(3) Citradhara, the twentieth century Mīmāṁsaka of village Ṭabhakā.

Of these the possibility of the first, namely, Citradhara, the 15th century commentator on the *Anargharāghava*, being identical with our present author is automatically precluded. For, in the *Śṛṅgārasāriṇī* and the *Vīrataraṅgiṇī* we come across citations from authors of a later period of history, viz., Gaṅgānanda, Viśvanātha and Paṇḍitarāja Jagannātha.

Similarly, the last, i.e., the 20th century Mīmāṁsaka cannot be the same as our present author. For, five of Citradhara's verses have been quoted in the *Vidyākarasahasraka*[1], an anthology of Sanskrit verses compiled by Vidyākara Miśra of the 19th century and they include one each from the *Śṛṅgārasāriṇī*[2] and the *Vīrataraṅgiṇī*.[3] Besides, we have also come across a manuscript of the *Vīrataraṅgiṇī* dated 1674 Śāke=1752 A. D.

Now, the rest, i.e., Citradhara, the early eighteenth century writer on poetics appears, in all probability, to be identical with our present author. For, besides citing verses of Citradhara, the author of the *Śṛṅgārasāriṇī*, the *Vīrataraṅgiṇī* etc., Vidyākara in his anthology has quoted a verse of one Vaṁśadhara.[4] The same verse has been cited by Citradhara in his *Śṛṅgārasāriṇī* to illustrate **आभियोगिकी रति** with due acknowledgment that the said verse is composed

1. Verse Nos 520, 547, 760, 761 and 836.
2. *Śṛṅgārasāriṇī*—51 =*Vidyākarasahasraka*–520.
3. *Vīrataraṅgiṇī* –3 =*Vidyākarasahasraka*–761.
4. The verse beginning with the words **दरमुद्रितपुण्डरीकमुग्धे** etc. *Vide Vidyākarasahasraka*—Verse No. 565.

by his father.[1] And from the pañjī-records we gather that Mm. Citradhara was the son of Mm. Vaṁśadhara.

OUR PRESENT AUTHOR

Mahāmahopādhyāya Citradhara hailed from Mithilā. He was an inhabitant of village Maṅgaraunī.[2] He was the son of Mm. Vaṁśadhara *alias* Theghū and the grandson of Caturbhuja of the *Dariharā* family of the brahmins of Mithilā.

Mm. Vaṁśadhara was the daughter's son (*dauhitra*) of Mm. Pītāmbara Vidyānidhi, the father of Mm. Trilocana *alias* Avilambasarasvatī, Mm. Dhanañjaya *alias* Daṇḍapāṇi, Mm. Gokulanātha and Mm. Jagannātha of the illustrious *Phaṇadahā* family. Of the sons of Mm. Pītāmbara Vidyānidhi, Mm. Gokulanātha stands out as the greatest literary figure of his age for his high academic attainments and unique contributions to the advancement of the different branches of Sanskrit learning.

Mm. Vaṁśadhara, 'a great *dharmaśāstrī*[3], had four sons and a daughter. Mm. Citradhara was the eldest of them; three others, according to seniority, being Manodhara, Mm. Dharaṇīdhara and Mm. Rudradhara. The daughter was married to Rāma Jhā of the *Gaṅgaurā* branch of the *Budhabāla* family. To her was born a son named Mm. Acala.

Mm. Citradhara was the teacher and hence a senior contemporary of Mm. Sacala *alias* Bhavānīnātha of the *Hariamaya* family.[4] Mm. Sacala wrote a commentary

---

1. "यथा तातचरणानाम्---दरमुद्रित---····· ·· " *Vide Śṛṅgārasāriṇī*--Verse No. 43.
2. Situated at a distance of two miles north-east of Madhubani Railway Station (N. E. Railway) in the Darbhanga District.
3. *Vide* Mishra : Introduction (p. 14) to the *Vidyākarasahasraka*.
4. Mm. Sacala says--"सर्वज्ञादिव संप्राप्य श्रीचित्रधरशर्मणः ।"—*Rasapradīpikā*—Introductory Verses—3 ab.

entitled *Rasapradīpikā* on the *Āryāsaptaśatī*[1] of Govardhanācārya. He was also an eminent jurist famous for his sound judgments, all delivered in Sanskrit by him when he was the Chief Judge of Tirhut. The attention of scholars has already been drawn to it.[2]

HIS AGE

In his 'History of Tirhut' Singh tells us that Citradhara is traditionally assigned to the 19th Century A. D.[3] But that is not the real age of our author.

Mm. Sacala, the pupil and hence a junior contemporary of our author had delivered judgments in Sanskrit. One of his judgments is dated 'Tuesday, the 13th of the bright half of the month of Jyaiṣṭha of Śāke 1716', which corresponds to June 10, 1794 A.D.

Furthermore, the gift of two villages, Mahagavan and Salaiya, in the Jubbalpur District granted by Peshwa Madhava Rao Narayan to Mm. Sacala is dated Śāke 1710 corresponding to the year 1788 of the Christian Era.

Besides, the grant of village Chanour to the same scholar from Mahārāja Mādhava Siṁha is dated 1779 A.D. and that of village Jagatpur from Mahārāja Pratāpa Siṁha is dated 1771 A. D.

And all this led Mm. Dr Gaṅgānātha Jhā to hold that Mm. Bhavānīnātha *alias* Sacala flourished during the eighteenth century of the Christian Era.[4]

---

1. Published by Pt. Keshi Mishra, Darbhanga, 1931 with a foreword by Mm. Dr Ganganatha Jha.
2. *Vide* K. P. Jayaswal's paper "A judgment of a Hindu Court in Sanskrit"—JBORS–Vol VI-pt II-pp. 246-258, 1920.
3. *Vide* p. 124,
4. *Vide* his foreword to the *Rasapradīpikā*-commentary on the *Āryāsaptaśatī*.

Mm. Vaṁśadhara, the father of Mm. Citradhara is said to have enjoyed the patronage of Mahārāja Rāghava Siṁha of Mithilā[1] during the beginning of the eighteenth ceutury A. D.

Mm. Vaṁśadhara was the sister's son (*bhāgineya*) of Mm. Gokulanātha and as such junior to the latter by only one generation. Mm. Citradhara was the son of Mm. Vaṁśadhara and as such he was junior to Mm. Gokulanātha by two generations. And Mm. Gokulanātha was born "in the decade 1640-50 A. D."[2]

Under the present circumstances, the birth of Mm. Citradhara can safely be assigned to the first decade of the eighteenth century, if not earlier. The find of a manuscript of his *Vīrataraṅgiṇī* dated 1674 Śāke, corresponding to 1752 A. D.[3], may also be treated as a corroborative evidence.

HIS WORKS

1. *Vīrataraṅgiṇī*
2. *Śṛṅgārasāriṇī*
3. *Rājastutipadya.*[4]
4. *Vināyakastava.*[5]

Besides these literary works one *Pramāṇapramoda*, a philosophical work is also attributed to Mm. Citradhara.[6] In addition to these the compilers of the Descriptive Catalogue of Manuscripts in Mithilā have wrongly ascribed

1. *Vide* Miśra : Introduction (p. 14) to the *Vidyākarasahasraka.*
2. *Vide* Bhattacharya : History of Navya-Nyāya in Mithilā (p. 193) Darbhanga, 1958
3. *Vide infra*
4. Cited in the *Vīrataraṅgiṇī* p. 13.
5. Cited *ibid.* pp. 13, 15 and 17.
6. *Vide* History of Tirhut-p. 124.

the *Citramīmāṁsā* of Appayya Dīkṣita also to Mm. Citradhara.[1]

THE VĪRATARAṄGIṆĪ

The *Vīrataraṅgiṇī*, as the very name suggests, is a short treatise on Sanskrit poetics dealing chiefly with the *Vīrarasa*. The four types of *vīra-s* : *Yuddhavīra, dānavīra, dayāvīra* and *dharmavīra* have been discussed with copious illustrations, most of which are author's own. Besides, the different types of *rīti*-s and *guṇa*-s have also been dealt with *in extenso*. While discussing his own views the author has taken into account the views of the preceding theorists of poetry with due acknowledgment.[2] They include Vāmana, Mammaṭa, Bhoja, Bhānudatta, Viśvanātha and Paṇḍitarāja Jagannātha.

MANUSCRIPT MATERIAL

We have consulted all the three manuscripts of the *Vīrataraṅgiṇī* available to us. For future references they have been marked A, B and C. Their description is as follows :—

Ms "A"—A bound copy ($10\frac{1}{2}'' \times 8\frac{3}{4}''$) containing *inter alia* the *Vīrataraṅgiṇī*, complete in 15 pages, correctly written in Maithilī characters, lines varying from 23 to 30 to a page and letters 32 to 40 to a line. This manuscript is dated 1830 Śāke. The colophon reads as follows—

लिखितैषा सोदरपुरसंमिश्रश्रीजयनाथशर्म्मात्मजश्रीयदुनाथशर्म्मणा लालगञ्जग्रामवासिना ॥ शाके १८३० सन् १३१६ साल श्रावण-शुक्लद्वादश्यां रवौ ॥ शुभम्भूयात् ॥ श्रीरस्तु ॥*॥

This manuscript is preserved with us.

1. *Vide* vol. II, Nos. 28 (p. 39) and 28A (p. 40).

2. Still there are certain passages from the *Sarasvatīkaṇṭhābharaṇa* cited in the *Vīrataraṅgiṇī* which have been left unacknowledged.

Ms "B"—A paper manuscript, complete, $11\frac{1}{4}'' \times 3\frac{3}{4}''$, consisting of 8 folios, correctly written in Maithilī characters, lines varying from 8 to 19 to a folio and letters 49 to 78 to a line. This manuscript is deposited in the Kameshwar Singh Darbhanga Sanskrit University Library. It is the third manuscript of the bundle No. 5. It is the oldest manuscript and is dated 1674 Śāke.[1]

Ms "C"—A paper manuscript, complete, $13\frac{1}{4}'' \times 4\frac{3}{4}''$, consisting of 16 folios, correctly written in Devanāgarī script, lines varying from 6 to 11 to a folio and letters 50 to 60 to a line This manuscript belongs to the Mithila Institute of Post-graduate Studies and Research in Sanskrit Learning, Darbhanga. It bears the number 4650 of the Manucripts' Section. The colophon reads as follows—

इति श्रीमन्महामहोपाध्यायश्रीचित्रधरविरचिता वीरतरंगिनी [-तरङ्गिणी] समाप्ता ।

We are grateful to the authorities of the Kameshwar Singh Darbhanga Sanskrit University and Mithila Institute of Post-graduate Studies and Research in Sanskrit Learning for allowing us to utilise their manuscripts for the present edition.

1. For the colophon *vide* p. 40, foot-note 1.

श्रीमदिष्टदेवतायै नमः ।

अथ वीरतरङ्गिणी प्रारभ्यते ।

ॐ नमो गिरीन्द्रनन्दिनीपदारविन्दरेणवे ।[1]

उच्चैरानमते सदैव भजते भव्यानि नव्यानि यो
दित्सन्नामनुते[2] ऽखिलेऽषि जगति स्वल्पान्यमूनि ध्रुवम् ॥
यस्यैकः कर आनताभयकरो नो जातु विश्राम्यति
प्रीत्यै सोऽस्तु समस्तवस्तुभरणन्यस्ताशयो विघ्नराट् ॥१॥

यदासेवनतः खेदहानेरानन्द उत्तमः ।
स वीरः कस्य धीरस्य न चित्तमवगाहताम्[3] ॥२॥

अथ वीररसो निरूप्यते । तत्रोत्साहस्थायिभावको रसो वीरः । उत्साहोऽध्यवसायः, सोऽप्यवधारणात्मा स्वकृतिसाध्यतानिश्चयस्तज्जन्यं सुखं वा । स चायं वीरश्चतुर्द्धा—युद्धवीरो, दानवीरो, दयावीरो, धर्म्मवीरश्चेति ।

तत्र युद्धवीरो यथा—

दूरे तिष्ठ मृदो[4] वृकोदर निजोदारोदरं पूरये-
र्बालौ स्थ≍कुरुतं किशोरचरितं मा तिष्ठतं सम्मुखे ।
भूयःशिक्षितभार्गवीयविलसच्छस्त्रैकमित्रस्य मे
निर्य्यद्बाणपरम्परामनुभवत्वेषोऽधुना फाल्गुनः ॥३॥

---

१. Missing in Ms B and C
२. Mss A, B and C read दित्सून्नामनुते
३. C reads -गाहते
४. A reads मृधो

यथा वा——

पृष्ठे[1] तिष्ठतु वानरावलिरसौ वत्सोऽप्यसौ वीक्षतां
साफल्यं लभताम्मुनेरभिनवा शिक्षा समक्षं हरेः ।
भूयस्तोषितपार्व्वतीपरिवृढप्रौढप्रसादोद्धतो
धत्तामेष मदोयकार्म्मुकचलद्घ्राणावली[2] लोलताम् ॥४॥

दानवीरो यथा——

कुप्यत्त्वेष पितामहः कलयतु क्रोधान्निषेधं गुरु-
स्तिष्ठन्तु स्वजनाः सुदीनवदनाः पद्माऽयतां सद्मनः ।
किञ्चेयं स्फुरतु प्रपञ्चरचना सौपर्व्वणी माऽथवा
पाणावस्य वटोरिह श्रुतिपटोर्द्दानोदकं पात्यते ॥५॥

यथा वा——

स्वाधीना जगती वसुव्रजवती विश्राणिता न क्वचित्
स्वायत्तो न च दातुमेकमनसा चिन्तामणिश्चिन्तितः ।
नानीतो निकटे निदेशवशगः कल्पद्रुमो दित्सता
हन्तोपेत्य चलाचलं [3]वपुरिदं किन्दत्तमुक्तं भवेत् ॥६॥

दयावीरो यथा——

पत्त्रिन्न त्रपसेऽतिभीतमनसे पारावतायाक्रमं
विक्रम्य स्पृहयन्नु पर्य्यनुसरन् माऽतिक्रमं कल्पयेः ।
जीवेः कृत्तमदीयपीवरवपुःपिण्डामिषैस्तोषितो
नेहे दीनजनोपकारविमुखीमेनामधीनान्तनुम् ॥७॥

---

१. A reads धृष्टा
२. A and C read वलद्
३. A reads जनु——

यथा वा—

ग्राहेण [1]ग्रहिणोग्रविग्रहवता गाढं गृहीतो बला-
ज्जीवग्राहमसौ विरौति नितरां दन्तावलो दुःखितः ।
पद्मे मुञ्च वसेह सद्मनि मनागेकाकिनी काऽत्र भी-
रेषोऽस्मि त्वरितो[2] मतङ्गजपतेरुद्धारभारोत्सुकः ॥८॥

धर्म्मवीरो यथा—

दूरे तिष्ठतु मेदिनी मदकृतो गच्छन्त्वमूस्सम्पदो
गाढं वा विपदः पतन्तु सहसा मुञ्चन्तु वा बान्धवाः[3] ।
भूदेवस्य गुरोरमुष्य जरतो नाशाय हासास्पदं
मिथ्यावागतिनिष्ठुरेण मनसा हा धिक् कथं कथ्यताम् ॥९॥

यथा वा—

अद्यासौ विनिवर्त्ततां विरचितो राज्यॅाभिषेकोत्सवो
भव्योऽयं भुवनाधिपत्यमहसा वत्सो वनं सेवताम् ।
किञ्चामी वत निष्पपञ्चमनसः पञ्चासवो यान्तु मे
हेयो[4] धर्म्महृदां सदैव सुहृदां मा भूद् वचोव्यत्ययः ॥१०॥

अत्र व्यभिचारिण आवेगादयो भवन्ति । तत्र आवेगस्त्वराविशेषो विलक्षणा चित्तवृत्तिर्य्या सम्भ्रमशब्देनाभिधीयते । स युद्धवीरे व्यभिचारी यथा—

भो भोः कुत्र धनुः कशक्तिरसमा बाणाः क्व वाहाः क्व च

---

१. C reads ग्रहिलो—
२. A reads त्वरितं
३. A reads बन्धवः
४. A reads राज्ञाभिषेको—while B राजाभिषेको —
५. A reads हेया

क्वास्ते हन्त रथः क्व सारथिरसौ क्वामी भटाः प्रस्थिताः ॥[1]
वर्त्तन्तामथवाऽधुना क्वचिदिमे किं साध्यमेभिर्ब्बला—
देषोऽस्मि स्वयमेव वीर[2] ! भवतः शिक्षासमीक्षोत्सुकः ॥११॥

दानवीरे स यथा—

एष प्राज्यतराज्यमोदितविधेस्तोषाददोषान्मया
प्राप्तः काञ्चनशैलराडतिजवाद्विद्राव्य[3] देवेश्वरान् ॥
सद्यः सोऽयमजिह्मगेन मनसा संपाद्यतामर्थिसात्
को जानातु सुरा जयेयुरपि मां दम्भादमी दाम्भिकाः ॥१२॥

दयावीरे स यथा—

नापृष्टा कमलालयाऽपि मुकुटं नालक्षितं निष्पतन्
नूनं विच्युतमुत्तरीयमपि मे किं हीयते तावता ॥
मोदादेत्य गजेन्द्रमेनमचिरादुद्धृत्य दीनं बला—
न्निःशङ्कं करणीयदुर्गजलधेरेषोऽस्मि पारंगतः ॥१३॥

धर्म्मवीरे स यथा—

भो भो धर्मधनाः प्रवीणमतयः किं चिन्तया ऋत्विजः
सद्यः साधुसमाप्तिमद्य विधितो वैधः क्रतुर्न्नीयताम् ॥
सीदन्तु स्वजना हरन्तु रिपवः प्रौढा इमाः सम्पदः
प्रारब्धो मख एष शेषमगतः केनाधुना त्यज्यताम् ॥१४॥
शौर्य्याद्यतिशयादिजनितं निजोत्कर्षज्ञानं गर्व्वः । स युद्धवीरे

---

१. C reads संस्थिताः
२. C reads घोर
३. C reads—शैल उग्रसमरे द्विराण्य (?)

व्यभिचारी । यथा--

केयं वानरवीथिका शिशुतरः सौमित्रिरेष क्व च
कायं वीरतरोऽपि धीरचरितो रामो रघूणां पतिः ॥
मय्यासक्तकठोरकार्म्मुकवरे दिव्यैकशस्त्रोद्धुरे
जेताऽपि त्रिपुरस्य खण्डपरशुस्तिष्ठेन्न वा सम्मुखे ॥१५॥

दानवीरे स यथा--

दत्तेयं वसुधा बुधाय विधितस्त्रिःसप्तकृत्वो मया
विद्याभिक्षुकलक्षमच्छलमतिना सन्तोषितं सर्व्वतः ॥
एतस्याद्यवटोरपि श्रुतिपटोश्चापप्रतापार्थिनः
शिक्षादानविधावपि श्लथमिदं हाधिक्किमेतन्मनः ॥१६॥

दयावीरे स यथा--

सद्यःकृत्तवपु ⩙ प्रभूतपिशितैरेनं[1] कपोतं क्रमात्
सन्तोष्यातिं[2] कठोरचेतसमिमं श्येनं मुदा रक्षतः ॥
केयं नाम ममासमास्तुतिरियं सभ्यैः समुल्लासिता
प्राणोद्दामविरामतोऽप्यसुमतो रक्षां सदैवेच्छतः ॥१७॥

धर्म्मवीरे स यथा--

ये ये धर्म्मधुरन्धराः क्षितिभुजोऽभूवन्नलाद्या भुवि
प्रौढास्तैर्न्न जिहासितं व्रतमिदं यस्यां मुदा रक्षितम् ॥
तस्यामेव समुन्नतेन वहता तामेव राजश्रियं[3]
त्याज्यं भोः कथमद्य तेन[4] मनसा सत्यव्रतं धीधनाः ॥१८॥

---

१. C reads—रेकं
२. A reads सन्तोष्याद्य
३. C reads राज्यश्रियं
४. C reads कथमुच्यते न

परापराधजनितो वाक्पारुष्यादिकारणीभूतश्चित्तवृत्ति[1] विशेषोऽमर्षः । स युद्धवीरे व्यभिचारी । यथा--

अद्योद्दाम[2] ललामबाहुपरिघव्रातोद्धतो धारयन्
दिव्यं धाम जितोऽचिराद्बलिसुतो बाणावलीभिर्बलात् ॥
पापे किं हरिदम्बरेऽन्तरगता विघ्नं विधत्से मुधा
सङ्ग्रामादपगच्छ शिक्षय शिशोर्लक्ष्यं पुनस्त्र्यक्षतः[3] ॥१९॥

दानवीरे स यथा--

मूढाः किं कुरुतेह लुब्धमनसो भूयो निषेधं मुधा
नो जानन्ति भवादृशोरसु[4]दशस्तत्त्वं ममत्वं गताः ॥
किन्तद्धर्म्म मम त्वगन्तरगतं किं वा भवेत् कुण्डलं
प्राणानप्यहमर्थिने सरभसं विश्राणितुं प्रोद्यतः ॥२०॥

दयावीरे स यथा—

मोदेनाद्य कपोतपोतक चिराच्चित्ते न चिन्तां कुरु
प्रारब्धो भवतः पराभव-परीहाराय कोऽपि क्रमः ।
भोभोः क्रूर ! कृपाकलामृतमरो ! श्येन ! क्षमस्व क्षणं
क्षुत्तृष्णातरलो मदीयपिशितैस्तोषं मुदा[5] पोषय ॥२१॥

धर्म्मवीरे स यथा—

किरीटिन्नुद्दामं त्यज सपदि गर्व्वं जडमते !

---

१. वृत्ति missing in B
२. A reads अद्योद्यान
३. B reads लक्ष्यं पुनस्त्र्यक्षकः
४. C reads वसु
५. B reads मया

वृथा भीमासीमस्वगुणगणमानी विहरसि[1] ।
जहीहि[2] प्राखर्य्यं यदुवर ! न यूयं परिचिता
ममोर्व्वीयं दूरे वसतु, न तु सत्यव्रतमिदम् ॥२२॥

पूर्व्वानुभूतार्थविषयकं ज्ञानं स्मरणम् । तत् युद्धवीरे यथा—

सन्नद्धाः कुरवो निबद्धमुकुटास्तेऽवस्थिताः सम्मुखे
हं हो वीरह्रदेकहेमनिकषो व्यूढो[3] बलात् कौरवैः ।
तत्सूत ! द्रुतमेव वाहय रथं द्रक्ष्यामि शिक्षापटू[4]—
नागच्छेन्न जवेन सम्प्रति गुरुर्न्निर्ज्जित्य संसप्तकान् ॥२३॥

अत्र 'ते' इति पदेन तत्तदपराधकारित्वेन[5] पराक्रमवत्त्वेन वा कुरूणां स्मरणं द्योत्यते ।

दानवीरे यथा—

तेऽमी पुण्यदृशोऽर्थिनः परिगताः[6] स्थास्यन्ति यास्यन्ति वा
स्फीताऽपीयमशेषसम्पदसमा वर्त्तेत नो वा चिरम् ।
कालोऽप्येष सुपुण्यदः पुनरपि प्राप्यो न वाप्यो मया
तच्चेतश्चतुर ! द्रुतं कुरु हितं देहीप्सितानर्थिने ॥२४॥
अत्र 'ते' इति पदेन तपःकुलादिशालित्वरूपया पात्रतयाऽर्थिनां[7]
स्मृतिर्द्योत्यते । एवं दयावीरादावप्यनुसन्धेयम् ।

---

१. A reads विहरति
२. B reads जहीति
३. A reads मूढो
४. A reads पटुर्न्ना—
५. न dropped in C
६. B reads परिणताः
७. C reads रूपतयार्थिनां

नीतिमार्गानुस्मृत्यादिजनितार्थनिर्द्धारणं मतिः । सा युद्धवीरे यथा—

वत्सास्त्वेह मनाग् मदीयमचिरात्पश्यासमं[1] कौशलं
निस्सारं जगदेतदस्थिरमिदं नूनं यशः स्थास्यति ।
एष व्याकुलबन्धुभिः परिवृतः पद्मप्रसन्नाननो
मोदादेति दशाननस्तदहमप्यस्मि क्षणादग्रणीः ॥२५॥

अत्र नीतिशास्त्राद्यालोचनेन जनितेन यशःस्थैर्य्यज्ञानेन मतिरूपव्यभिचारिणा युद्धवीरः प्रत्याय्यते । एवं दानवीरादावप्यूह्यम् ।

इष्टावाप्तिजनितो मनःप्रसादो हर्षः । स युद्धवीरे पूर्व्वोदाहृते "पद्मप्रसन्नाननो मोदादेति दशानन" इत्यत्र बोध्यः । एवं दानवीरादावप्यूह्यम् ।

धृतिः[2] सन्तोषः दुःखेऽप्यदुःखबुद्धिर्व्वा । सा युद्धवीरे यथा—

तूणीराः शरजालकैर्व्विरहिताः छिन्नं धनुः शस्त्रकै—
रस्त्राण्याहतशक्तिकानि समरे संलक्षितानि स्फुटम् ।
एषोऽस्मि स्थिर एव सम्प्रति तथाऽप्युद्यद्भुजाभ्यन्तर—
व्यूढोरःपरिपीडनव्यसनितां[3] धत्तामसौ राघवः ॥२६॥

एवं दानवीरादावप्यूह्यम् ।

ऊहो वितर्कः । स युद्धवीरे यथा—

रामोऽसौ न भवेद्यदि त्रिजगतां वीराग्रणीस्तत्कथं
प्राप्तो वारिधिलङ्घनेन सहसा लङ्कामशङ्कामिमाम् ।
तच्चित्तादपयातु खेदनिचयो मोदोच्चयश्चीयतां

---

१. B reads पश्याशु सं—
२. धृतिः missing in B
३. C reads व्यसनिनां

साफल्यं लभतां चिरादधिगता शिक्षा मम व्यक्षतः ॥२७॥

एवं दानवीरादावप्यूह्यम् ।

तदेवमावेगगर्व्वामर्षस्मृतिमतिहर्षधृतिवितर्का अष्टावत्र व्यभिचारिण इत्याभाति ।

रसतरङ्गिण्यान्तु—

"वीरे उत्साहस्मृतिधृतिगर्व्वावेगामर्षौग्र्य[1]रोमाञ्चा व्यभिचारिण" [2]इत्युक्तम् । तत्र उत्साहो वीरे स्थायीति न व्यभिचारिषु गणनीयो, रोमाञ्चोऽप्यत्रानुभाव एव भवतीति न व्यभिचारिभावतां भजते, ततस्तौ मया न व्यभिचारिषु गणितौ । उग्रताप्रायो रौद्र एव व्यभिचारितां भजत इति मया न गणित इति सुधीभिर्व्विभाव्यम् ।

अत्र च युद्धवीरे जेतव्य आलम्बनम्, रणदर्शनतूर्य्यनिनादादय उद्दीपनविभावाः, रोमाञ्चहर्षादिसूचकवाक्यादयोऽनुभावाः । एवं दानवीरे सम्प्रदानमालम्बनम्, दानप्रशंसापरं शास्त्रं सम्प्रदानगुणादयश्चोद्दीपनविभावाः, रोमाञ्चयाचकसम्मानादयोऽनुभावाः । दयावीरे दीन आलम्बनं, तदीयक्लेश उद्दीपनम्, अश्रुपातादयोऽनुभावाः । धर्म्मवीरे धर्म्मविषय आलम्बनं, धर्म्मप्रशंसापरं शास्त्रमुद्दीपनं, विषदङ्गीकारादिवाक्यमनुभावः । व्यभिचारिणस्तूक्ता एव । **साहित्यदर्पणे** तु—

"सञ्चारिणस्तु धृतिमतिगर्व्वस्मृतितर्करोमाञ्चा"[3] इत्युक्तं तत्सहृदयैर्व्विचारणीयमितिदिक् ।

---

१. B reads-**मर्षोग्र**-and C reads **मर्षौज्वर-**(?)

२. *op. cit.*—pp. 112-113(reads..धृतिमति ..व्यभिचारिभावाः) -Kshemraj Shreekrishna Dass, Bombay, Samvat 1971 edition.

३. *Op. cit.*-III-234 ab (p. 187) Nirnaya Sagar Press, Bombay, 1936 edition. This is missing in Kshemraj Shri Krishna Dass, Bombay, samvat 1973 edition.

जगन्नाथपण्डितास्तु—"सत्यवीरो विद्यावीरः क्षमावीरो बलवीर" इत्यपरेऽपि चत्वारो वीरभेदाः,[1] तथा हि—

"सपदि विलयमेतु राज्यलक्ष्मीरुपरि पतत्वथवा कृपाणधारा ।
अपहरतुतरां शिरः कृतान्तो मम तु मतिर्न मनागपैति सत्यात्॥ २८॥"[2]

इति पद्ये सत्यवीरः प्रतीयते ।

"न च सत्यस्यापि धर्म्मान्तर्गततया धर्म्मवीर एव सत्यवीरस्यान्तर्भाव इति वाच्यम्, दानदययोरपि तदन्तर्गततया तद्वीरयो[3]रपि धर्म्मवीरात्पृथग्गणनानौचित्यात् ।"[4]

एवम्

"अपि वक्ति गिरांपतिः स्वयं यदि तासामधिदेवताऽपि वा ।
अयमस्मि पुरो हयाननस्मरणोल्लङ्घितवाङ्मयाम्बुधिः ॥२९॥"[5]

इत्यत्र विद्यावीरः प्रतीयते ।

"नन्वत्र युद्धवीरत्वं युद्धत्वस्य वादसाधारणस्य वाच्यत्वादिति चेत्, क्षमावीरे किं ब्रूयाः ? यथा—

अपि बहलदहनजालं मूर्ध्नि रिपुर्म्मे निरन्तरं धमतु ।
पातयतु वासिधारामणुमात्रं न किञ्चिदाभाषे ॥३०॥"[6]

"बलवीरे वा किं समादध्याः ? यथा—

परिहरतु धरां फणिप्रवीरः सुखमयतां कमठोऽपि तां विहाय ।

---

१. Cf *Rasagaṅgādhara* pp. 50-51, Nirnaya Sagar Press, Bombay, 1947 edition.
२. *ibid.* p. 50 (reads पतन्त्वथवा कृपाणधाराः and धर्मात्)
३. C reads द्वयोरपि for तद्वीरयोरपि
४. *ibid.* (reads धर्मवीररस एव तद्वीरस्याप्यन्तर्भाव इति)
५. *ibid.* B and C read यदि for अपि and सा for वा
६. *ibid.* pp. 50-51 (reads ननु चात्र) A reads युद्धवीरत्वे

अहमिह पुरुहूत ! पक्षकोणे निखिलमिदं जगदण्डकं वहामि ॥३१॥

पुरुहूतं प्रत्येषा गरुत्मत उक्तिः[1] ।

ननु 'अपि[2] वक्ति' 'परिहरतु धरामि'ति पद्यद्वये गर्व्व एव नोत्साहः[3] । मध्यस्थपद्ये तु धृतिरेव ध्वन्यत इति भावध्वनय एवैते न रसध्वनय इति चेत्[4], तर्हि युद्धवीरादिष्वपि गर्व्वादिध्वनितामेव किं न ब्रूया"[5] इति प्राहुः । तच्चिन्त्यम् । अधर्म्मान्निवृत्तावुत्साहो धर्म्मवीरे स्थायी । स च सत्यवीरेऽप्यविशिष्ट एवेति न सत्यवीरो धर्म्मवीरात् पृथक् । धर्म्मोत्साहमात्रस्य तत्र स्थायित्वे दानवीरस्य तदन्तर्भावापत्तेः । विद्यावीरोदाहरणे बलवीरोदाहरणे च गर्व्व एव क्षमावीरोदाहरणे च धृतिरेव प्रतीयते न तु क्वापि स्थायी । न हि सर्व्व एवोत्साहः स्थायी ।[6] युद्धाद्युत्साहचतुष्टयमेव प्राचीनपरिगणितं स्थायितां भजते । न हि प्राचीनैरिवाधुनिकैरपि स्थाय्यादिपरिभाषां कर्त्तुं[7] शक्यते । अन्यथा भावध्वनिविलोपापत्तेरिति दिक् । अथ प्रसङ्गात् किञ्चिदुच्यते । माधुर्य्यौजःप्रसादाख्येषु त्रिषु गुणेषु द्वावोजःप्रसादौ वीररसवृत्ती । तत्र वर्गाणां प्रथमतृतीययोर्द्वितीयचतुर्थाभ्यां योगे उद्ध्वंस्थितेनाधःस्थितेन वा रेफेण वर्णस्य वर्णान्तरेण समता, टवर्गः शकारषकारौ दीर्घसमासश्च ओजोव्यञ्जकाः । तदुक्तम्—

"योगे आद्यतृतीयाभ्यामन्त्ययो रेण तुल्ययोः ।
टादिः शषौ वृत्तिदैर्घ्यं गुम्फ उद्धृत ओजसि ॥"इति ।

---

१. B reads गरुत्मदुक्तिः
२. C reads यदि
३. B reads नोत्साहो
४. C reads एतत्
५. *Ibid.* p. 51 (reads जगदङ्कम्). The portion इति भावध्वनय...ब्रूयाः missing in B.
६. B adds किन्तु after स्थायी
७. Missing in C.

यथा—

मूर्द्धव्रातोपहारस्फुटतरगिरिशप्रौढरूढप्रसाद—
प्राप्तप्रोद्दामलोकत्रितयजयपरिव्यक्तराजन्महिम्नः ॥
कः स्थाता मे पुरस्ताद्भुजबलवलितोद्दण्डकोदण्डनिर्य्यन्
नाराचव्रातवेगं जगति विषहतां को रणेषु प्रवीरः ॥३२॥

पदानां प्रसिद्धार्थत्वं सन्निधानञ्च[1] प्रसादव्यञ्जकं, तच्च पूर्व्वोदाहृतेषु बहुषु पद्येषु प्रायो बोध्यम्। ननु कथं त्रय एव गुणाः, सन्त्यन्येऽपि,[2] तथा हि—

"श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता।
अर्थव्यक्तिरुदारत्वमोजःकान्तिसमाधयः ॥"

इति दशशब्दगुणा दशैवैतेऽर्थगुणा[3] इति वामनादीनां मतम्।

तत्र भिन्नानामपि शब्दानामेकत्वप्रतिभानप्रयोजकः[4] संहितयैकजातीय-वर्णविन्यासविशेषःश्लेषः[5]।

तदुक्तं वामनेन—

"यत्रैकपदवद्भावः पदानां भूयसामपि।
अनालक्षितसन्धीनां स श्लेषः[6] परमो गुणः ॥[7]" इति।

---

१. C reads प्रसिद्धार्थत्वसन्निधानं
२. C reads सन्त्यपि तेऽपि
३. B reads दशैवार्थगुणा
४. C reads प्रतिभावन—
५. श्लेषः missing in C
६. A reads संश्लेषः
७. *vide vṛtti under Kāvyālaṅkārāsūtra*-3-I-25-

यथा [1]मदीय**विनायकस्तवे**--

यौष्माकीणालिकोद्यत्तुहिनकरकलाचन्द्रिकामीहमानाः
पायं पायं पृथिव्याममृतकरकरानप्यतोषं दधानाः ।
एते तस्या अलाभादमुदितमनसो जीवनं हातुकामाः
कामं मन्ये चकोराः शिखिकणकवलानाकुलाः शीलयन्ति ॥ ३३॥

गाढत्वशैथिल्याभ्यां व्युत्क्रमेण मिश्रणं प्रसादः । यथा मदीय-**राजस्तुतिपद्ये**--

एतन्मामकमत्र भावय वचस्सत्यं नरेशाशिषो[2]
बन्यास्ते[3] ददतिस्म सन्ततपरिप्राप्तोत्सवा दन्तिनः ।
त्वद्धाटीभयविद्रुतारिरमणीवक्षोजबद्धस्पृहाः
सेवन्ते[4] मृगयां न जातु शवरा यत्कन्दरामन्दिराः ॥ ३४॥

अत्र 'ददतिस्मे'त्यन्तं शैथिल्यं, पुनः 'प्राप्तोत्सवा' इत्यन्तं गाढत्वं, पुन'र्ह्दन्तिन' इत्यत्र शैथिल्यं, पुनरपि 'स्पृहा' इत्यन्तं गाढत्वम् इत्यादि बोध्यम् ।

रीत्यभेदः[5] समता । रीतयस्तु वैदर्भी गौडी पाञ्चाली चेति[6] तिस्रः । तत्र माधुर्य्यव्यञ्जकवर्णघटिता असमासा अल्पसमासा वा रचना वैदर्भी । एषैवोपनागरिकेत्युच्यते[7] । सा यथा—

खञ्जनस्य रुचिरेतु गञ्जनं कञ्जमद्य न जनस्य रञ्जनम् ।

१. C reads मदीये
२. A reads तथ्यं नृदेवाशिषो
३. C reads धन्यास्ते
४. A reads स्मेरन्ते
५. A and C read रीतिभेदः
६. C reads पाञ्चालीति
७. एषै.....च्यते missing in C.

चिन्तयामि चतुरेण चेतसा लोचनं किमपि मोचनं शुचः ॥३५॥

अत्र चोपक्रमादासमाप्तेरेका वैदर्भी ।

ओजोव्यञ्जकवर्णघटिता दीर्घसमासवती रचना गौडी । सा यथा—

मूर्द्धव्रातापहारस्फुटतरगिरिशप्रौढरूपप्रसाद-
प्राप्तप्रोद्दामलोकत्रितयजयपरिव्यक्तराजन्महिम्नः ।
कः स्थाता मे पुरस्ताद्भुजबलवलितोद्दण्डकोदण्डनिर्य्यन्-
नाराचव्रातवेगं जगति विषहतां को रणेषु प्रवीरः[1] ॥३६॥

एषैव परुषेत्युच्यते ।

माधुर्य्यस्यौजसश्च व्यञ्जकेन वर्णेन घटिता दीर्घसमासरहिता रचना पाञ्चाली । एषैव कोमलेति ग्राम्येति चोच्यते । सा यथा —

स्फुरत्तारकारा स्फुटललितहारावलियुता
स्मरोन्मेषभ्राजत्तनुरमलशोभासमुदया ।
समारूढा लिप्सामसमनवदोलां विधुमुखी
प्रियागारं सारायितजघनतारा परिययौ ॥३७॥

मूर्धन्यवर्गान्त्यगेन टवर्गान्यस्पर्शेन ह्रस्वेन रेफेण णकारेण च घटितत्वे सति समासरहितत्वमल्पसमासत्वं वा माधुर्य्यम् ।

तदुक्तम्—

"मूर्धन्यवर्गान्त्यगाः स्पर्शा अटवर्गा रणौ लघू ।
अवृत्तिर्म्मध्यवृत्तिर्व्वा माधुर्य्ये घटना मता ॥"[2] इति ।

यथा—

"खञ्जनस्ये"[3]त्यादि पूर्व्वोदाहृतपद्ये ।

---

१. Same as verse No. 32 *vide supra* p. 12.
२. *Kāvyaprakāśa*—VIII—74
३. *vide supra* verse No. 35.

अपरुषवर्णघटितत्वं सुकुमारता । यथा—

रचितां नवमालिकाप्रसूनैरुरसीयं नवमालिकां दधाना ।
हरितातुलचोलकं वसाना न समानालमलं विभूषणेन ॥३८॥

झटितिप्रतीयमानार्थान्वयकत्वमर्थव्यक्तिः । यथा—

"रचितामि" त्यादौ ॥

कठिनवर्णघटनारूपविकटत्वलक्षणोदारता । सा यथा मदीय**विनायकस्तवे**—

लीलालास्ये कदाचित्तव पदयुगलाघाततो भूतधात्री
न्यञ्चत्यद्धा[1] समन्तात्त्यजति पुनरिमां नूनमाशागजौघः[2] ।
शेषोऽप्येषोऽसुशेषो वमति गुरुतया रक्तमारक्तनेत्रो
गुर्वीमुर्वीं विमोक्तुं प्रभवति कमठाधीश्वरः पृष्ठनिष्ठाम् ॥३९॥

पदानां नृत्यत्प्रायत्वं विकटता, सैवोदारतेति केचित् ।

ओजस्तु प्राक्लक्षितमुदाहृतञ्च ।

अविदग्धवैदिकादिप्रयोगयोग्यानां पदानां परिहारेण प्रयुज्यमानेषु पदेषु लोकोत्तरशोभा कान्तिः । यथा—

"रचितामि" त्युदाहृतपद्ये ।

बन्धगाढत्वशैथिल्ययोः क्रमेणावस्थानं[3] समाधिः । अनयोरेव प्राचीनैरारोहावरोहव्यपदेशः कृतः । क्रम एव हि तयोः प्रसादस्य[4] भेदकः । तत्र हि तयोर्व्युत्क्रमेण वृत्तेः । यथा—

दृप्तदुष्टतरदानवदर्प्पच्छेदवेदितनिजैकमहिम्नः ।

---

१. A reads मुञ्चत्यद्धा
२. C reads स्रजौघः
३. C reads—स्थापनं
४. C reads प्रसादार्थ—

कोऽपि नीरदरुचः कुरुतान्मे शर्म्म सन्ततदृगन्तनिपातः ॥४०॥

अत्र प्रथमेऽर्द्धे आरोहः परेऽर्द्धेऽवरोहः ।

एवं दशार्थगुणा अपि तन्मा[1]मान एव । तथाहि—

विदग्धचेष्टितस्य तदस्फुटत्वस्य तदुपपादकयुक्तेश्च समानाधिकरण-रूपसंसर्गः श्लेषः[2] । यथा—

एतत्कञ्चुकमङ्गुलीयक[3]मिदं कस्याः किमत्र प्रियं
सौरस्यादिति पृष्टयोर्दयितयोस्तूष्णीमनुस्मेरयोः ।
एकामङ्गुलिमुद्रया स्मितपटुस्सन्तोष्य तत्कञ्चुकं
तामन्यां परिधापयन् प्रियतमः प्रत्यङ्गमालिङ्गति ॥४१॥

अर्थस्य वैमल्यं प्रयोजकमात्रपरिग्रहः प्रसादः ।यथा—

"कमलानुकारि वदनमि"त्यादि । प्रत्युदाहरणन्तु "कमलकान्त्यनुकारि वदनमि"त्यादि ।

अर्थस्य प्रक्रमाभङ्गः समता ।

यथा पूर्व्वोदाहृतेषु पद्येषु । प्रत्युदाहरणन्तु प्राचीनपद्यं यथा—

च्युतसुमनसः कुन्दाः पुष्पोद्गमेष्वलसाद्रुमा
मलयमरुतः सर्प्पन्तीमे वियुक्तधृतिच्छिदः ।
अथ[4] च सवितुः शीतोल्लासं लुनन्ति मरीचयो
न च जठरतामालम्बन्ते क्रमोदय[5]दायिनीम् ॥ ४२॥

ऋतुसन्धिप्रतिपादनपरेऽत्रपद्ये द्वितीयपादे प्रक्रमभङ्गः, मलयमरुता-मसाधारणत्वात् । एवन्तु द्वितीयः पादः पठितव्यः----

---

१. B reads एतन्मा—
२. श्लेषः missing in C
३. A reads—रोयक—
४. C reads अपि
५. A reads क्रमोद्गम

'मनसि च गिरं बध्नन्तीमे किरन्ति न कोकिला' इति ।

एकस्या एवोक्तेर्भङ्ग्यन्तरेण पुनः पुनः कथनात्मकमुक्तिवैचित्र्यं माधुर्य्यम् । यथा मदीय**विनायकस्तवे**—

दूरे स्तादेष विस्तारितनिजविभवः पद्मभूः पीतवासा
अप्याशाभाजनं नो भजतु सुखमसौ योगतो भोगिभूषः ।
प्राज्यस्वाराज्यलीलो विबुधपरिवृढो नैव दीनोपजीव्यो
भव्यायैकान्तमेका द्विरदमुख ! मम स्यात्तनुस्तावकीना[1] ॥४३॥

अत्र ब्रह्मादिभिर्नास्ति मम प्रयोजनमित्ययमर्थो दूरावस्थानप्रार्थनादि-रूपेणोक्तिवैचित्र्येणाभिहितः ।

परुषेऽप्यर्थे अकाण्ड[2] शोकदायित्वाभावरूपमपारुष्यं सुकुमारता । यथा 'यशःशेषो राजति ।'

वस्तुनोर्व्वर्णनीयस्यासाधारणक्रियारूपयोर्व्वर्णनमर्थव्यक्तिः । यथा--

वेशं विधाय लघुवेश्म निजं विहाय
द्वारं गृहस्य समुपेत्य चिराय पत्युः ।
पद्मानना प्रियतमाभिमुखे कथञ्चित्
स्थित्वा लिलेख भुवमङ्गुलिभिः पदस्य ॥ ४४ ॥
अयमेव स्वभावोक्त्य[3]लङ्कार इति लोकैरुच्यते ।

"चुम्बनं देहि मे भार्य्ये कामचाण्डालतृप्तये" इत्यादिग्राम्यार्थपरीहार उदारता । सा चोदाहृतेषु पद्येषु बोध्या ।

पदार्थे वाक्यार्थरचनं, वाक्यार्थस्य पदेनाभिधानं, व्याससमासौ, विशेष-

---

१. A reads स्तावकीया
२. C reads अकाण्डे
३. C reads स्वभावोक्तिर—

णस्य साभिप्रायत्वञ्चेति पञ्चप्रकारार्थप्रौढिरोजः[1] । तत्र पदार्थे वाक्यार्थरचनं यथा—

विरहसमयहानप्रोल्लसच्चक्रवाक[2]क्रमविधिकमनीयकीडनारम्भकाले ।
विदलदमलपद्मश्रेणिसौरभ्यरम्ये[3]वहति च पवमाने चित्रमस्त्येवमानः ॥

अत्र प्रातरित्येक[4]पदार्थप्रतिपादनाय विरहसमयेत्यादिवाक्यं रचनम् । वाक्यञ्चात्रपदसमूहः ।

वाक्यार्थस्य पदेनाभिधानं यथा—
वरविहिता[5]लङ्कारा रसभावस्फीतिरीतिमती ॥
अभिसारिकेव कविता कमनीया कस्यचिद्भवति ॥ ४६ ॥

अत्र

"अभिसारयते कान्तं या मन्मथवशंवदा ।
स्वयं वाऽभिसरत्येषा धीरैरुक्ताऽभिसारिका ॥"

इत्यत्र लक्षणवाक्यार्थस्याभिसारिकापदेनाभिधानम् । एकस्यैव वाक्यार्थस्य बहुभिर्वाक्यैरभिधानं व्यासः । स यथा—

अवाञ्छितमुपायाति वाञ्छितञ्च न लभ्यते ॥
सुखं यतो विधिः सोऽयं नानुरोधकरः क्वचित् ॥ ४७ ॥

अत्र दैवपरतन्त्रोऽयंलोक इत्येकस्मिन् वाक्यार्थे नानावाक्यरचनम् ।
बहुवाक्यार्थस्यैकवाक्येनाभिधानं समासः । स यथा—
कान्ते केलिकलाकुतूहलवति प्रोल्लास्य पद्मं पुरः

---

१. C reads प्रौढ ओजः
२. A reads चक्रवाके
३. A reads रस्ये
४. प्रातरित्येक—Missing in C
५. A reads रवरहिता

साकूतं करजेन खण्डितवति ज्ञातेङ्गिता प्रेयसी ॥
वक्त्रं वीक्ष्य विहस्य किञ्चिदमलस्विद्यत्कपोलस्थली-
कालिन्दीतटसत्तमालविटपासक्तां लतामालिखत् ॥ ४८ ॥

अत्र कान्तः कमलमुल्लासितवान्, ततश्च नखेन खण्डितवान्[1], ततश्च कान्तेङ्गितं प्रेयसी ज्ञातवतीत्यादि बहुवाक्यार्थः । क्त्वाप्रत्ययेन, बहुव्रीहिणा, तिङन्तेन चानुवाद्य विधेयभावेनैकवाक्यार्थीकृतः ।

साभिप्रायत्वञ्च प्रकृतार्थपोषकता । यथा—

वाचा विश्वासभाजः कथमपि भजतः स्वस्वरूपं प्रदर्श्य
स्फीताशेषस्वजातावरणविरहितान्नाथ ! सद्यो विधत्से ।
किञ्च त्वञ्चारुयात्रामपि हरसि हरे ! वाटपाटच्चराणां
रीतिः केन त्रिलोकीसदनजनगुरो ! ग्राहिता ग्राहतेयम् ॥ ४९ ॥

अत्र तवाध्यापने कस्समर्थ इति वक्तव्यार्थस्य पोषकं त्रिलोकीसदन-जनगुरुत्वं विशेषणम् ।

दीप्तरसत्वं कान्तिः, तच्च स्फुटप्रतीयमानरसत्वं, तदुदाहरणन्तु "कान्ते केलिकले"त्युदाहृतपद्यम् ।[2]

अवर्णितपूर्व्वोऽयमर्थः पूर्व्ववर्णितच्छायो वेति कवेरालोचनं समाधिः । ज्ञानस्य विषयतासम्बन्धेनार्थनिष्ठत्वादर्थगुणता । तत्राद्यो यथा—

अयमानन्दकरोचिः शीतमयूखो न भासते सुमुखि ।
किन्तु विहायसि मुकुरे तव मुखमनुबिम्बितं भाति ॥ ५० ॥

द्वितीयस्तु प्रायशस्सर्व्वत्रैवेति । महाराजस्तु—चतुर्विंशतिः शब्द-गुणास्तावन्त एवार्थगुणास्तावन्त एव च दोषगुणास्तथाहि—

---

१. ततश्च.....वान् omitted in B.
२. *vide supra* pp. 18-19.

"त्रिविधाश्च गुणाः काव्ये भवन्ति कविसम्मताः ।
बाह्याश्चाभ्यन्तराश्चैव ये च वैशेषिका इति ॥
बाह्याःशब्दगुणाश्चास्मिन्नान्तराश्चार्थसंश्रयाः ।[1]
वैशेषिकास्तु ते नूनं दोषत्वेऽपि हि ये गुणाः ॥
चतुर्विंशतिराख्यातास्तेषु ये शब्दसंश्रयाः ।[2]
ते तावदभिधीयन्ते नामलक्षणयोगतः ॥
श्लेषः प्रसादः समता माधुर्य्यं सुकुमारता ।
अर्थव्यक्तिस्तथा कान्तिरुदारत्वमुदात्तता ॥
उक्तस्तथान्यदौर्ज्जित्यं प्रेयानथ सुशब्दता ।
तद्वत्समाधिः सौक्ष्म्यञ्च गम्भीर्य्यमथ विस्तरः ।
संक्षेपः संमितत्वञ्च भाविकत्वं गतिस्तथा ।
रीतिरुक्तिस्तथा प्रौढिरथैषां लक्ष्यलक्षणे ॥"[3]

तत्र श्लेषाद्या उदारत्वान्ता पूर्व्वनिरुक्तप्राया एव । उदात्तता तु श्लाघ्यविशेषणवत्ता । यथा—

श्रुत्वा यं सहसागतं निजपुरात्त्रासेन निर्गच्छतां
शत्रूणामवरोधनैर्ज्जललवप्रस्यन्दतिम्यत्पुटाः ।
शुभ्रे सद्मनि पल्लविन्युपवने वाप्यां नवाम्भोरुहि
क्रीडाद्रौ च सशाद्वले विवलितग्रीवैर्व्विमुक्ता दृशः ॥५१॥

अत्र शुभ्रे-पल्लविनि-नवाम्भोरुहीत्यादिश्लाघ्यविशेषणोपादानादुदात्तता । ओजः पूर्व्वोदाहृतमेव ।

---

१. The *Sarasvatīkaṇṭhābharaṇa* reads '-गुणास्तेषु चान्तरास्त्वर्थ—

२. वैशेषिकास्तु.....शब्दसंश्रयाः missing in A

३. *Sarasvatīkaṇṭhābharaṇa*—p. 47, Nirnaya Sagar Press, Bombay, 1934 edition

और्ज्जित्यं गाढबन्धता । यथा—

अस्मिन्नीषद्वलितविततस्तोकविच्छिन्नभुग्नः
किञ्चिल्लीलोपचितविततः पुञ्जितश्चोच्छ्रितश्च[1] ॥
धूमोत्पीडस्तरुणमहिषस्कन्धलीनो दवाग्नेः
स्वैरं सर्प्पन् सृजति गगने गत्वरानभ्रभङ्गान् ॥५२॥

अत्र गाढबन्धस्य स्पष्टमेव प्रतिभानादौर्ज्जित्यम् ।

प्रियतराख्यानं प्रेयः । यथा—

सौजन्याम्बुनिधे ! बुधप्रिय[2] ! गुणप्राकार[3] ! धर्म्मद्रुम[4]-
प्रारोह ! प्रतिपन्नवत्सल ! महात्यागिन् ! विवेकाश्रय ! ।
लक्ष्म्यावास ! मनस्विनीमनसिजव्यापारदीक्षागुरो !
श्रीमन् ! मुञ्च ! किमित्यमुं जनमुपस्प्रष्टुं दृशा नार्हसि ॥५३॥

अत्र 'सौजन्याम्बुनिधे' इत्यादीनां प्रियार्थानां पदानामुपादानं प्रेयः ।

सुप्तिङां[5] व्युत्पत्तिः सुशब्दता । यथा—

तस्याजीवनिरस्तु मातरवमा जीवस्य माजीवतो
भूयाद्वाऽजननिः किमम्ब जनुषा जन्तोर्व्वृथाजन्मनः ।
यस्त्वामेव न वन्दते न यजते[6] नोपैति नालोकते
नोपस्तौति न मन्यते न मनुते नाध्येति न ध्यायति ॥५४॥

अत्राजीवनिरजननिरित्यादीनां सुबन्तानां वन्दते यजते[7] इत्यादीनां तिङन्तानां च व्युत्पत्तिः सुशब्दता ।

---

१. A reads—ज्झितश्च
२. बुध missing in A
३. C reads प्रारब्ध
४. C reads कर्म्म
५. C reads सुप्तिङादि—
६. A reads भजते
७. A reads भजत

समाधिस्तु अन्यत्रान्यधर्म्मारोपः । यथा—

'दृष्टिः कमलिनीमनुवदती'ति ।

अन्तस्संजल्परूपत्वं सूक्ष्मता । यथा----

केवलं दधति कर्तृवाचिनः प्रत्ययानिह न जातु कर्म्मणि ।
धातवः सृजतिसंहृशास्तयः स्तौतिरत्र विपरीतकारकः ॥५५॥

अत्र सृजतिसंहरतिशास्तिस्तूयते इति शब्दानामन्तःसंजल्परूपत्वेन सूक्ष्मतयोन्मेषात् सूक्ष्मत्वम् ।

ध्वनिमत्ता गाम्भीर्य्यम् । यथा----

मौलौ धारय पुण्डरीकममितं तन्वात्मनो विक्रमं
चक्राङ्कं वह पादयुग्ममवनिं दोष्णा समभ्युद्धर ।
लक्ष्मीं भ्रूनिकटे निवेशय भव ज्यायान् दिवौकस्पते-
र्व्विश्वान्तःकरणैकचौर ! तदपि ज्ञातो हरिः खल्वसि ॥५६॥

अत्र नाभ्यां पुण्डरीकधारणं, चक्राङ्कितकरत्वं, दंष्ट्रया वसुधोद्धरणं, वक्षःस्थलस्थितलक्ष्मीकत्वम्, इन्द्रावरजत्वं च ध्वन्यते इति गाम्भीर्य्यम् ।

विस्तरो व्यासः । स च पूर्व्वं दर्शितः ।
संक्षेपः समासः । सोऽपि दर्शित एव ।

यावदर्थकपदत्वं सम्मितत्वम् । यथा----

केचिद्वस्तुनि नो वाचि, केचिद्वाचि न वस्तुनि ।
वाचि वस्तुनि चाप्यन्ये, नान्ये वाचि न वस्तुनि ॥५७॥

अत्रार्थस्य पदानाञ्च तुलाविधृत[1]वत्तुल्यत्वेन सम्मितत्वम् ।

भावतो वाक्यरचनं भाविकत्वम् । यथा—

एह्येहि वत्स ! रघुनन्दन ! पूर्णचन्द्र !

---

१. C reads—विवृति—

चुम्बामि मूर्द्धनि चिरञ्च परिष्वजे त्वाम् ।
आरोप्य वा हृदि दिवानिशमुद्वहामि
वन्देऽथवा चरणपुष्करकद्वयन्ते ॥५८॥

अत्र प्रहर्षवशादनौचित्येनापि 'वन्देऽथवा चरणपुष्करकद्वयमि' त्यादीनामुक्तत्वाद्भाविकत्वम् ।

आरोहावरोहक्रमो गतिः । सा च पूर्व्वमेवोदाहृता ।

उपक्रमस्य निर्व्वाहो रीतिः । यथा—

ग्रावणा नासि गिरेः क्षता न पयसा क्लान्ता[1]ऽसि न ग्लापिता
निश्वासैः फणिनोऽसि न त्वदनुगा नायासिता काऽपि न ।

स्वं वेश्म प्रतिगच्छतोरिति मुहुः श्रीशार्ङ्गिणोः सस्पृहं
सा प्रश्नोत्तरयुग्मपङ्क्तिरुभयोरत्यायता पातु वः[2] ॥५९॥

अत्र प्रत्येकं प्रश्नपदानन्तरं नञो विनिवेशात् प्रक्रमाभेदो रीतिः । यद्वा रीतिः षड्विधा—वैदर्भी, पाञ्चाली, गौडी, आवन्तिकी,[3] लाटी मागधी चेति । तत्र प्रथमास्तिस्रो लक्षिता उदाहृताश्च । आवन्तिकी[4]तु समस्तत्रिचतुरपदा पाञ्चालीवैदर्भ्योरन्तराले वर्त्तमाना रीतिः । सा यथा—

एतानि निस्सहतनोरसमञ्जसानि
शून्यं मनः पिशुनयन्ति पदानि तस्याः ।
एते च तीरतरवः कथयन्ति ताप-
मालम्बितोज्झितपरिग्लपितैः प्रवालैः ॥६०॥

---

१. *Sarasvatīkaṇṭhābharaṇa* reads नार्त्तासि *vide* p. 69
२. A reads नः
३. B and C read आवन्तिका
४. B and C read प्रावन्तिका

समस्तरीतिव्यामिश्रा लाटी । यथा--

अयमुदयति मुद्राभञ्जनः पद्मिनीना-
मुदयगिरिवनालीबालमन्दारपुष्पम् ।
विरहविधुरकोकद्वन्द्वबन्धुर्ब्बिभिन्दन्
कुपितकपिकपोलक्रोडताम्रस्तमांसि ॥६१॥

आरब्ध[1]रीतेरनिर्व्वाहात् खण्डरीतिर्म्मागधी । यथा--

करिकवलनशिष्टैः शाकशाखाग्र[2]पत्रै-
रुणसरणयोऽमी सर्व्वतो भीषयन्ते ।
चलितशबरसेनादत्तगोशृङ्गचण्ड-
ध्वनिचकितवराहव्याकुला विन्ध्यपादाः ॥६२॥

विशिष्टा भणितिरुक्तिः । यथा---

कुशले पृष्टे जीवतीत्युक्तिः ।

उक्तेः प्रौढः परीपाकः प्रौढिः । स च परीपाकः प्रकृतिस्थकोमल-कठोरेभ्यो ग्राम्योपनागर[3]नागरेभ्यो वा पदेभ्य उद्धृतानां पदानामावापोद्वापाभ्यामभ्यासेन सन्निवेशचारुतया निष्पद्यते ।

असंयुक्तरेफ[4]णकारादिवर्णघटितं पदं कोमलम् । कण्ठ्यरेफसंयोगवत्पदं कठोरम् । एतदुभय[5]भिन्नं प्रकृतिस्थं पदम् ।

अतिप्रसिद्धं पदं ग्राम्यं यथा हस्तविवाहादिपदम् ।

नातिप्रसिद्धं नागरं यथा पशुपतिपर्य्यायरूपपतिपदम् । एवमन्यदपि । नात्यन्तं प्रसिद्धं नागरं यथा वपुरादिपदम् ।

---

१. A reads आरम्भ
२. A reads शाखासु
३. नागर missing in C.
४. C reads रेफेणक—
५. A reads तदुभय –

सचायं[1] परिपाकस्त्रिविधः। आद्यन्तयोः स्वादुतरो नारिकेरपाकः मध्यान्तयोः स्वादुतरो मृद्वीकापाकः। आदिमध्यान्तस्वादुतर आम्रपाकश्चेति। तत्र नारिकेरपाको यथा—

अभ्युद्धृता वसुमती दलितं रिपूरः
क्षिप्तक्रमं कवलिता बलिराजलक्ष्मीः।
अत्रैकजन्मनि कृतं यदनेन यूना
जन्मत्रये तदकरोत् पुरुषः पुराणः ॥६३॥
एवं मृद्वीकापाकसहकारपाकावप्युदाहरणीयौ।

उक्ताः शब्दगुणाः।

अथार्थगुणाः[2] कथ्यन्ते। तत्र श्लेषप्रसादसमताः पूर्व्वोक्तप्राया एव[3] माधुर्य्यन्तु क्रोधादौ अतीव्रता।

यथा—

भ्रूभेदे सहसोद्गतेऽपि वदनं नीतं परां नम्रता-
मीषन्मां प्रति भेदकारि हसितं नोक्तं वचो निष्ठुरम्।
अन्तर्बाष्पजडीकृतं प्रभुतया चक्षुर्न्न विस्फारितं
कोपश्च प्रकटीकृतो दयितया मुक्तश्च न प्रश्रयः[4] ॥६४॥

अत्र वासवदत्तालक्षणस्यार्थस्य योऽयं[5] विनयावलम्बनेन कोपचिह्नन्हवस्तन्माधुर्य्यम्।

---

१. स चायं mis-ing in C.
२. अथ missing in C.
३. एव missing in A.
४. *Ratnāvalināṭikā*—II—20 (reads भ्रूभङ्गे)
—Nirnaya Sagar Press, Bombay, 1913 edition
५. A reads सोऽयं

अनिष्ठुरत्वं सौकुमार्य्यम् । यथा—

सद्यः पुरीपरिसरेऽपि शिरीषमृद्वी
सीता जवात् त्रिचतुराणि पदानि गत्वा ।
गन्तव्यमस्ति कियदित्यसकृद् ब्रुवाणा
रामाश्रुणः कृतवती प्रथमावतारम्[१] ॥६५॥

अर्थस्य साक्षात्कथनमर्थव्यक्तिः । यथा—

पृष्ठेषु शङ्खशकलच्छविषुच्छदानां
रेखाभिरङ्कितमलक्तकलोहिनीभिः ।
गोरोचनाहरितबभ्रुबहिष्पलाश-
मामोदते कुमुदमम्भसि पल्वलस्य ॥६६॥

अत्र विशेषणविशिष्टस्य[२] कुमुदस्वरूपस्य[३] साक्षादिव प्रतिपत्तिरर्थ-व्यक्तिः ।

कान्तिः पूर्वोक्तैव ।

भूत्युत्कर्ष उदारता । यथा—

प्राणानामनिलेन वृत्तिरुचिता सत्कल्पवृक्षे[४] वने
तोये काञ्चनपद्मरेणुकपिशे[५] पुण्याभिषेकक्रिया ।
ध्यानं रत्नशिलागृहेषु विबुधस्त्रीसन्निधौ संयमो

---

१. *Mahānāṭakam*—III—17 (reads परिसरे च)
—Narayan Press, Calcutta, 1890 edition
२. C reads विशेष—
३. A reads कुमुदरूप—
४. Mss A,B and C reads सङ्कल्प
५. B reads रेणुकूट for पद्मरेणु

यद्वाञ्छन्ति तपोभिरन्यमुनयस्तस्मिंस्तपस्यन्त्यमी[1] ॥६७॥

अत्र मारीचाश्रमस्य [2]सत्कल्पवृक्षादिपदैर्विभवोत्कर्षस्य प्रतिपादनमुदारता ।

आशयोत्कर्ष उदात्तता[3] । यथा--

पात्रे पुरोवर्तिनि विश्वनाथे क्षोदीयसि क्ष्मावलये च[4] देये ।
व्रीडास्मितन्तस्य तदा तदासीच्चमत्कृतो येन स एव देवः ॥ ६८ ॥

अत्र सकलक्ष्मावलयप्रदानेऽपि जातव्रीडतया बलेराशयोत्कर्षप्रतिपादनमुदात्तता ।

अर्थविशेषे स्वाध्यवसाय ओजः । यथा—

तान्येव यदि भूतानि ता एव[5] यदि शक्तयः ।
ततः परशुरामस्य न प्रतीमः पराभवम् ॥ ६९ ॥

अत्र परशुरामो विजयत एवेत्यस्मिन्नर्थे स्वाध्यवसायप्रतिपादनमोजः । प्रौढाहङ्कार और्जित्यम् । यथा—

उमावधूर्भवान् दाता याचितार इमे वयम् ।
वरः शम्भुरलं ह्येष त्वत्कुलोन्नतये[6] विधिः ॥ ७० ॥

अत्र 'इमे वयमि' त्यात्मान्वितव्रतचर्य्यादिसमुत्थप्रौढाहङ्कारप्रतिपादनादौर्जित्यम् ।

---

१. *Abhijñānaśakuntalam*—VII—12 (p. 131; reads धर्माभिषेक—for पुण्याभिषेक —and गृहासु for गृहेषु), Mithila Institute, 1957 edition.
२. Mss A & B read सङ्कल्प
३. आशयोत्कर्ष उदात्तता missing in C
४. *Sarasvatīkaṇṭhābharaṇa* reads ऽपि *vide* p. 78
५. A reads तावत्यो यदि
६. *Sarasvatīkaṇṭhābharaṇa* reads—ऽद्भूतये *vide* p. 79

अर्थेष्वभीष्टता प्रेयान् । यथा—

रसवदमृतं कस्सन्देहो मधून्यपि नान्यथा
मधुरमधिकं चूतस्यापि प्रसन्नतरं[1] फलम् ।
सकृदपि पुनर्म्मध्यस्थः सन् रसान्तरविज्ञनो
वदतु यदिहान्यत्स्वादु स्यात् प्रियादशनच्छदात् ॥ ७१ ॥

अत्रामृतप्रभृतिभ्यः प्रियादशनच्छदस्याभीष्टताप्रतिपादनात्प्रेयान् ।

दारुणार्थं[2]स्यादारुणशब्दैः प्रतिपादनं सुशब्दता । यथा—

देवव्रते वाञ्छति दीर्घनिद्रां द्रोणे च कर्णे च यशोऽवशेषे ।
लक्ष्मीसहायस्य तवाद्य वत्स ! वात्सल्यवान् द्रोणिरयं सहायः ॥७२॥

व्याजालम्बनं समाधिः । यथा—

दर्भाङ्कुरेण चरणः क्षत इत्यकाण्डे
तन्वी स्थिता कतिचिदेव पदानि गत्वा ।
आसीद् विवृत्तवदना च विमोचयन्ती
शाखासु वल्कलमसक्तमपि द्रुमाणाम् ॥७३॥

अर्थस्य सूक्ष्मत्वं सौक्ष्म्यम् । यथा—

. . . . . .
. . . . . .[3]
. . . . . .
. . . . . ॥७४॥[4]

---

१. *Sarasvatīkaṇṭhābharaṇa* reads **रसं** *vide ibid.*
२. C reads **दारुणशब्द**—
३. *Abhijñānaśakuntalam*—II—13 (p. 33)
४. The text between **यथा** and **व्यञ्जनागम्यतया** etc. is missing in all the three manuscripts.

व्यञ्जनागम्यतया ऽनुरागादीनां शास्त्रार्थसव्यपेक्षत्वं गाम्भीर्य्यम् । यथा—

मैत्र्यादिचित्तपरिकर्म्मविदो[1] विधाय
क्लेशप्रहाणमिह लब्धसबीजयोगाः ।
ख्यातिञ्च सत्त्वपुरुषान्यतया ऽधिगम्य
वाञ्छन्ति तामपि समाधिभृतो निरोद्धुम् ॥७५॥

अत्र मैत्र्यादिपदानां शास्त्रसव्यपेक्षत्वाद्गाम्भीर्य्यम् ।
विस्तरसंक्षेपौ पूर्वोक्तावेव ।

अर्थस्य[2] तुल्यतया विभागः सम्मितत्वम् । यथा—

इन्दुर्म्मूर्ध्नि शिवस्य शैलदुहितुर्व्वक्त्रे नखाङ्कः स्तने
देयाद्वोऽभ्युदयं द्वयं तदुपमामालम्बमानं मिथः ।
संवादः प्रणवेन यस्य दलता कार्यैकतायां तयो-
रूर्द्ध्वर्द्धारविचिन्तितेन[3] च हृदि ध्यातः स्वरूपेण च ॥७६॥

अत्र प्रणवलक्षणस्यार्थस्य तुल्यत्वेन यथावद् विभज्य निवेशनं सम्मितत्वम् ।

साभिप्रायोक्तिविन्यासो भाविकत्वम् ।

दृष्टिर्हे प्रतिवेशिनि क्षणमिहाप्यस्मद्गृहे दीयतां
प्रायेणास्य पिता शिशोर्न्न विरसाः कौपीरपः पास्यति ।
एकाकिन्यपि यामि तद्वरमितः स्रोतस्तमालाकुलं
नीरन्ध्रास्तनुमालिखन्तु जरठच्छेदा नलग्रन्थयः ॥७७॥

अत्र तमालमालावलयितसरित्तीरकृतसङ्केतायाः कुलटायाः स्वतनौ

---

१. कर्म्म missing in C.
२. स्य missing in A.
३. A reads श्वास

भाविनां परपुरुषनखक्षतानां नलग्रन्थ्यालेखव्याजगोपनेन साभिप्रायभणनं भाविकत्वम् ।

अर्थादर्थान्तरावगमो गतिः । यथा—

शुभे कोऽयं वृद्धो ? गृहपरिवृढः, किं तव पिता ?
न मे भर्त्ता, रात्रौ व्यपगतदृगन्यच्च वधिरः ।
हु हुं हुं श्रान्तोऽहं शिशयिषुरिहैवापवरके
क्व यामिन्यां यासि स्वपिहि ननु निर्द्देशमशके ॥७८॥

अर्थस्योत्पत्तिक्रियाक्रमो रीतिः । यथा—

प्रथममरुणच्छायस्तावत्ततः कनकप्रभ-
स्तदनु विरहोत्ताम्यत्तन्वीकपोलतलद्युतिः ।
प्रभवति पुनर्ध्वान्तध्वंसक्षमः क्षणदामुखे
सरसबिसिनीकन्दच्छेदच्छविर्मृगलाञ्छनः ॥७९॥

स्वार्थस्य भङ्गीभणनमुक्तिः । यथा—

त्वमेवंसौन्दर्य्या स च रुचिरतायाः परिचितः
कलानां सीमानं परमिह युवामेव भजथः ।
अपि द्वन्द्वं दिष्ट्या तदिति सुभगे संवदति वा-
मतः शेषं चेत्स्याज्जितमिह तदानीं गुणितया ॥८०॥
अत्राभीष्टस्य नायकनायिकासङ्गमस्य भङ्ग्या[1] भणनमुक्तिः ।

विवक्षितार्थनिर्व्वाहः प्रौढिः । यथा—

त्वद्वक्त्रेन्दुविलोकनाकुलधिया धात्रा त्वदीयां श्रियं
निःक्षिप्य प्रतिराजकेषु विदुषां लक्ष्म्या त्वमापूरितः ।

---

१. A reads भङ्गी

तेनैते नियतं दरिद्रति गृहेष्वेषामियं दृश्यते
नैतामाद्रियसे त्वमिच्छसि च तां त्वामेव सा धावति ॥८१॥

अत्र 'त्वद्वक्त्रेन्दुविलोकनेन धात्रा त्वदीया श्रीः शत्रुषु निःक्षिप्ता, विदुषां च लक्ष्मीस्त्वय्यारोपिता। यतस्त्वं विपक्षलक्ष्मीमाद्रियसे, सा च त्वामनुधावति। या च विदुषां लक्ष्मीः तया त्वमापूरितः, तेन ते दरिद्रा, यतस्त्वमेनां नाद्रियसे इयं च विद्वद्गृहेष्वेव दृश्यते' इत्येतावतः प्रभूतार्थस्यानेन वाक्येन प्रतिपादितत्वात् विवक्षितार्थनिर्व्वाहः प्रौढिः[1]।

पदाद्याश्रितदोषेषु ये यत्र स्थलविशेषे दोषतां न भजन्ते ते तत्र दोषगुणा इति कथ्यन्ते। तत्र व्याकरणानिष्पाद्यत्वमसाधुत्वं दोषः तस्यापि क्वचिद्गुणत्वम्। यथा—

उन्नमय्य सकचग्रहमास्यं चुम्बति प्रियतमे हठवृत्त्या।
हुंहु मुञ्च ममेति च मन्दं जल्पितं जयति मानधनायाः[2] ॥८२॥

अत्र हुंहु मुञ्च ममेति म्लेच्छितस्यासाधुत्वेऽप्यनुकरणत्वाद् गुणत्वम्[3]। यत्र तु नानुकरणत्वं तत्र दोषत्वमेव। यथा—

भूरिभारभराक्रान्त[4]! बाधति स्कन्ध एष ते।
तथा न[5] बाधते स्कन्धो यथा बाधति बाधते ॥८३॥

अत्र बाधतेरात्मनेपदीयत्वाद् बाधतीत्यसाधु।

एवम्[6],

---

१. B reads प्रौढिरिति
२. *Sarasvatīkaṇṭhābharaṇa* reads मानवतीनाम्
३ गुणत्वम् missing in A
४. B and C read—क्रान्तो
५. A reads न तथा
६. A reads-त्यसाधुरेवं

आक्षिपन्त्वरविन्दानि[1] मुग्धे तव मुखश्रियम् ।
कोषदण्डसमृद्धानां किमेषामस्ति दुष्करम् ॥८४॥

अत्र 'न लोकाव्ययनिष्ठाखलर्थतृनामि'ति कर्त्तृकर्म्मणोः षष्ठीप्रतिषेधात् किमेषां दुष्करमित्यस्यासाधुत्वेऽपि सम्बन्धमात्रविवक्षातो गुणत्वम् । यदाह—

"इदं हि [2]शास्त्रमाहात्म्यदर्शनालस[3]चेतसाम् ।
अपभाषणवद्भाति[4] न च सौन्दर्य्यमुज्झति ॥" इति ।

यत्र च विवक्षादिनापि न [5]व्याकरणनिष्पाद्यत्वं तत्र वाक्यस्याप्यसाधुत्वमेव । यथा—

"नीरन्ध्रे गमितवति क्षयं पृषत्कै-
र्भूतानामधिपतिना शिलावितानें"[6] ॥८५॥
"गाण्डीवी कनकशिलानिभं भुजाभ्या-
माजघ्ने विषमविलोचनस्य वक्षः"[7] । ॥८६॥

अत्र गमितवतीति क्तवतोः[8] कर्म्मणि, आजघ्ने इति तङोऽस्वाङ्गकर्म्मणि, प्रयोगादपशब्दौ तौ । अत्र च शिलावितानवक्षइत्यादि[9]समभि-

---

१ B and C read आक्षिपन्त्य —
२. A reads कान्त—
३. A read° दर्शनानल—
४. A reads आभाषणवदाभाति
५. B reads व्यधिकरण
६. *Kirātārjunīyam*—XVII—61ab (reads नीरन्ध्रं परिगमिते, Mallinātha adds 'उच्छ्रायं गमितवति' इति प्रामादिकः पाठः), Nirnaya Sagar Press, Bombay,
७. *ibid*—63 cd
८. A reads क्षयतेः
९. B and C read वक्षः पद

व्याहारादेवासाधुत्वमिति पददोषादन्योऽयमसाधुत्वलक्षणो वाक्यदोषः। न च विषमविलोचनस्य वक्षः प्राप्याजघ्ने इत्यन्वयविवक्षणान्नासाधुत्वम्। 'आङो यमहन'[1] इत्यनुशासनेनाकर्म्मकात् स्वाङ्गकर्मकाच्च[2] तङो विधानात्। 'ल्यब्लोपे कर्म्मण्यधिकरणे चे'[3]त्यनुशासनन्तु यत्र ल्यबन्तं विनैव तदर्थावगतिस्तत्र पञ्चमीं विधत्ते। अत्र तु [4]ल्यबन्ताध्याहारसापेक्षा[5] ल्यबन्तार्थावगतिरिति न वक्षःपदात्पञ्चमीप्रसक्तिः। यदि तु 'ल्यब्लोप' इति सूत्रे लोपपदार्थस्यादर्शनस्याध्याहारस्थलेऽप्यर्थाध्याहारपक्षेऽविकलत्वात्, शब्दाध्याहारपक्षेऽपि पूर्वं तत्सत्त्वात्। अन्यथा तत्पक्षे क्वापि तत्सूत्रं न प्रवर्त्तेत। तदा भेत्तुमित्यध्याहार एवास्तु हनश्चाकर्म्मकत्वमिति वाच्यम्। तुमुनन्ताध्याहारे 'फलेभ्यो यातीतिवच्चतुर्थीप्रसङ्गात्। 'कनकशिलानिभमि'त्यस्यानन्वयापत्त्या समीपमेत्येत्यध्याहारपक्षस्य निरस्तत्वात् अध्याहारविनाकृतवाक्ये दोषोदाहरणसम्भवा[च्च।

एवम् "उपतिष्ठन्ति सावित्र्या सवितारं तपोधनाः" इत्यत्र 'उपान्मन्त्रकरणे'[6] इत्यनुशासनेन मन्त्रकरणे सति तिष्ठतेरुपोपसर्गान्नित्यमात्मनेपदविधानात्सावित्र्योपतिष्ठन्तीत्यस्यासाधुत्वमेव। एव'ञ्चासाधुत्वं पददोषेण वाक्यदोष' इति **प्रकाश**वचनमनुपादेयमेव।

एवं संयोगस्य क्वचित्तीव्रप्रयत्नो][7]च्चारणात् संयोगपरस्यापि लघुत्वमिति छन्दोभङ्गस्यापि गुणत्वम्। यदाहुः—

---

१. Pāṇini-1.III-28
२. A omits स्वाङ्गकर्मकात् and only reads नाकर्मकाच्च
३. A vārtika under Pāṇini—1-IV-31
४. A reads तत्तुल्यवर्णा—
५. A reads सापेक्ष—
६. Pāṇini—1-III-25
७. The portion within brackets missing in C

"यदा तीव्रप्रयत्नेन संयोगादेरगौरवम् ।
न छन्दोभङ्ग इत्याहुस्तदा दोषाय सूरयः ॥"[1] इति ।

यथा—

कृतार्थाश्च कृतार्थाश्च[2] मित्राणां न भवन्ति ये ।
तान् मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ८७ ॥

अत्र क्रशब्दे परेऽपि पञ्चमवर्णस्य लघुत्वम् । यत्र त्वतीव्रप्रयत्नेनैव संयोगस्योच्चारणं तत्र संयोगपरस्य गुरुत्वमेव यथा बर्हादिशब्दे । अत्र क्रादिशब्दे प्रथमवर्णस्य द्वित्वेन संयोगस्य हलादित्वं तीव्रप्रयत्नेनोच्चारणे प्रयोक्तव्यम् । बर्हादिशब्दे तु संयोगघटकवर्णस्य द्वित्वाभावान्न संयोगस्य हलादित्वमिति न तीव्रप्रयत्नेनोच्चारणमिति विवेक इति वदन्ति ।

एवं यतिभङ्गस्यापि क्वचिद्गुणत्वम् । यथा—

"शोभां पुष्यत्ययमभिनवः सुन्दरीणां प्रबोधः"[3] ॥ ८८ ॥

अत्र मन्दाक्रान्ताच्छन्दसि चतुर्थस्थाने यतिरपेक्षिता । तत्र यणादेशः परादिवच्चित्यमिति छन्दोऽनुशासनेन यणादेशस्य परपदादिवद्भावविधानात्, तत्संयुक्तहलोऽपि परपदादिवद्भावेनार्थतः पूर्वपदस्य तत्पूर्वमेव समाप्तेर्य्यत्यभङ्गप्रयोजनिकाया अतिदेशान्न यतिभङ्गः ।

यतिर्नाम विश्रामः । स च प्रायः पदान्ते भवति । पदञ्च विभक्त्यन्तं, विभक्तिश्च क्वचिल्लुप्ता । यथा—

दृप्तदुष्टतरदानवदर्प्पच्छेदवेदितनिजैकमहिम्नः ।
कोऽपि नीरदरुचः[4] कुरुतान्मे शर्म्म सन्ततदृगन्तनिपातः ॥ ८९ ॥[5]

---

१. *Sarasvatīkaṇṭhābharaṇa*—I—123 (p. 120)
२. Missing in A.
३. First foot of the verse quoted in *Sarasvatīkaṇṭhābharaṇa* —I— p. 121 (verse No 167)
४. C reads रुचेः
५. Same as verse No 40, *vide supra* pp. 15-16

अत्र प्रथमपादे[1] समासावयवत्वाल्लुप्ता । द्वितीयपादादावलुप्ताऽप्य[2]त्र द्रष्टव्या ।

"सन्धौ स्वरः पूर्वान्तवत् परस्यादिवद्वा" इति छन्दोऽनुशासनेन पूर्वापरयोरेकादेशः स्वरः क्वचित्पूर्वपदस्यान्तवत् क्वचिदुत्तरपदस्यादिवद्भवतीति विधीयते । तत्र पूर्वपदस्यान्तवद्भावो यथा--[3]

जम्भारातीभकुम्भोद्भवमिव दधतः सान्द्रसिन्दूररेणुम् ॥ ९० ॥

इत्यत्र पूर्वापरस्वरस्थाने[4] विहितस्य गुणस्य ओकाररूपस्य पूर्वपदस्य कुम्भस्यान्तवद्भावविधानेन पदसमाप्त्या सप्तमस्थाननियताया यतेरभङ्गः । क्वचिदुत्तरपदस्यादिवद्भावः । यथा—

कृपयैव सदा भक्तस्याहितानि चकर्त्त यः ।

समे चेतसि चिन्ताली[5]रालीनो हरतु द्रुतम् ॥९१॥

अत्र ह्यचः परादिवद्भावविधानेन तत्संश्लिष्टहलोऽपि परादिवद्भाव इति तत्पूर्वमेव पदसमाप्तेरतिदेशान्न यतिभङ्गः ।

चतुरक्षरादिपदस्य[6] मध्येऽपि यतिर्भवति यदि पूर्वः परो वा तत्पदघटको[7] वर्णः एको न स्यात् । यथा—

प्रणमत भवबन्धक्लेशनाशाय नारायणचरणसरोजद्वन्द्वमानन्दहेतुम् ॥९२॥

अत्र नारायणपदस्य मध्येऽपि नारेतिवर्णद्वयोत्तरं पदान्तयतिरिति दिक् ।

---

१. Missing in A
२. प्य missing in C
३. A reads भावः यथा—
४. C adds हि thereafter
५. C reads चिन्ताधी-
६. A and C omit पदस्य
७. A reads तद्घटको

एवमन्येषामपि दोषाणां गुणत्वं बोध्यमित्याह[1]। तदेतदुभयमपि मतं नानुमन्यन्ते **मम्मटभट्टाः**[2]। तथा हि—

श्लेषो यदि माधुर्य्यव्यञ्जकातिरिक्तवर्णघटितो[3] वृत्तिदैर्घ्यवान् तदौजसि नो चेन्माधुर्य्य एवान्तर्भवति। प्रसादोऽप्यंशे ओजसि अंशान्तरे च माधुर्य्य एवान्तर्भवति।

समता तु सर्व्वत्रानुचितैव। यथा—

प्रागप्राप्तनिशुम्भशाम्भवधनुर्द्वैधाविधाविर्भवत्[4]
क्रोधप्रेरितभीमभार्गवभुजस्तम्भापविद्धः क्षणात्।
उज्ज्वालः परशुर्भवत्वशिथिलस्त्वत्कण्ठपीठातिथि—
र्य्येनानेन जगत्सु खण्डपरशुर्देवो हरः ख्याप्यते ॥९३॥

अत्र क्रोधव्यञ्जके पादत्रये यो मार्गस्स न क्रोधानभिव्यञ्जके[5] चतुर्थे इति मार्गभेद एव समुचितः। यत्र तु न तथा तत्र पतत्प्रकर्षादिदोषाभाव एव पर्य्यवस्यतीति न समतागुणः।

माधुर्य्यन्तु भङ्ग्याङ्गीकृतमेव। सुकुमारता तु कष्टरूपदोषाभावरूपा। अर्थव्यक्तिस्तु प्रसादेनैव गतार्था। उदारता तु ओजसैव गतार्था। ओजस्तु भङ्ग्याङ्गीकृतमेव। ग्राम्यत्वदोषाभावरूपैव कान्तिः। समाधिस्तु प्रथमांश ओजसाऽपरांशे माधुर्य्येण गतार्थ इति। एवं दशार्थगुणा अपि नातिरिच्यन्ते। तथा हि श्लेष उक्तिवैचित्र्यमेव, न गुणः, अन्यथा प्रतिश्लोकमुक्तिवैचित्र्यलक्षणगुणभेदापत्तेः। प्रसादोऽप्यधिकपदत्वरूपदोषाभाव

---

१. **बोध्यम्** missing in B
२. C reads **नानुमन्यते मम्मटभट्टः**
३. A and C read **घटिता**
४. B reads **द्वैधक्रियाहं कृतः**
५. C reads **क्रोधनिमित्त-**

एव। समताऽपि भग्नप्रक्रमरूपदोषाभाव एव। माधुर्य्यमप्यनवीकृतत्वरूपदोषाभावरूपम्। सुकुमारताऽप्यमङ्गलरूपदोषाभावरूपा। अर्थव्यक्तिस्तु स्वभावोक्तिरलङ्कारः। उदारता तु ग्राम्यत्वरूपदोषाभावः। ओजस आद्याश्चत्वारो भेदा उक्तिवैचित्र्यमात्रसम्पादकाः, पञ्चमस्तु भेदोऽपुष्टार्थत्वरूपदोषाभाव एव। रसध्वनिरसवदलङ्काराभ्यां कान्तिरपि गतार्था। समाधिस्तु काव्यस्य कारणं न गुणोऽन्यथा प्रतिभाया अपि गुणत्वापत्तिरिति दिक्। एवं महाराजमतमपि न सम्यक्। तत्रोदारत्वान्ताः पूर्व्वमेवापृथग्भावेन दर्शिताः। उदात्तता तु श्लाघ्यविशेषणवत्ताऽपुष्टार्थत्वरूप[1]दोषाभाव एव। और्জ्जित्यं गाढबन्धतारूपमोजसैव गतार्थम्। प्रियतराख्यानरूपं प्रेयोऽप्युक्तिवैचित्र्यमात्रं न गुणः, अन्यथा गुणाख्यानं[2] क्रियाख्यानमित्यपि गुणभेदः स्यात्। सुबन्तानां तिङन्तानाञ्च व्युत्पत्तिरूपा सुशब्दता काव्यस्य कारणं न गुणः। अन्यत्रान्यधर्म्मारोपरूपः समाधिरपि रूपकेणोपमया वाऽलङ्कारेण गतार्थः। अन्तस्संजल्परूपत्वं सूक्ष्मत्वमप्युक्तिवैचित्र्यमात्रं सूक्ष्मालङ्कारो वा भवेत्। ध्वनिमत्तारूपं गाम्भीर्य्यन्तु उत्तमकाव्यतासम्पादकं व्यञ्जनयैव गतार्थम्। व्याससमासौ तूक्तिवैचित्र्यमात्ररूपावेव। सम्मितत्वमप्यधिकपदत्वरूपदोषाभाव एव। भाविकत्वमपि भावध्वनिगतार्थम्। आरोहावरोहक्रमरूपा गतिरपि प्रथमांशे ओजसा द्वितीयांशे माधुर्य्येण गतार्था। [उपक्रमनिर्व्वाहरूपा रीतिरपि भग्नप्रक्रमरूपदोषाभावगतार्था। विशिष्टा भणितिरुक्तिरपि परिसङ्ख्याद्यलङ्कारेण गतार्था।][3] प्रौढिरपि कान्त्यैव गतार्था। कान्तिरपि दोषाभावेण गतार्थेति न शब्दगुणाः पृथक्।

अर्थगुणेषु श्लेषप्रसादसमताः पूर्व्वनिरस्ता एव। माधुर्यसौकुमार्ये वस्तुव्यञ्जनयैव गतार्थे, अन्यथा प्रतिवस्तुगुणत्वापत्तेः। अर्थव्यक्तिरपि स्वभा-

---

१. A reads रूपम्
२ C reads -ख्यानक्रिया-
३. The portion within brackets missing in A

वोक्त्यलङ्कारेण गतार्था। कान्तिरपि पूर्व्वनिरस्तैव। उदारत्वमुदात्तता। ओजस्तु[1] वस्तुव्यञ्जनयैव गतार्थम्। और्जित्यमपि भावध्वनिगतार्थम्। प्रेयानपि शृङ्गारेण गतार्थः। सुशब्दताऽप्यसङ्गतारूपदोषाभावगतार्था। समाधिरपि रसभावध्वनिगतार्थः। सौक्ष्म्यमपि तथैव। गाम्भीर्य्यन्त्वशास्त्रज्ञे[2] श्रोतरि दोष एव, अन्यत्र तु दोषाभावपर्य्यवसन्नम्। सम्मितत्वमप्युक्ति-वैचित्र्यमात्रम्। भाविकत्वमपि व्याजोक्त्यलङ्कारेण गतार्थम्। गतिरपि वस्तु-व्यञ्जनयैव गतार्था। रीतिरपि पर्य्यायालङ्कारेण गतार्था। उक्तिप्रौढी अपि वस्तुव्यञ्जनयैव गतार्थे इति नार्थगुणाः पृथक्।

दोषगुणास्तु दोषाभावेणैव गतार्था इति सिद्धम्।

माधुर्य्यौजःप्रसादाख्यास्त्रय एव गुणा इति। तत्र माधुर्येण चित्तं द्रवति। ओजसा विस्ताररूपां दीप्तिमाप्नोति। प्रसादेन विकासमेति। द्रुति-दीप्तिविकासाख्यास्तिस्रश्चित्तवृत्तयश्चित्तस्य परिणामिनो विकारविशेषास्तत्र चित्तद्रुतिजनकत्वव्यङ्ग्यो गुणो वा जातिर्व्वा माधुर्य्यम्। चित्तदीप्तिजनकत्व-व्यङ्ग्यो गुणो वा जातिर्व्वा ओजः। चित्तविकासजनकत्वव्यङ्ग्यो गुणो वा जातिर्व्वा प्रसादः। न च द्रुत्यादिजनकत्वमेव तत्तद्गुणव्यवहारनिमित्तमस्तु किमतिरिक्तजात्येति वाच्यम्। जनकताऽवच्छेदकाग्रहे जनकत्वस्य दुर्ग्रहत्वात्। तदग्रहे तस्यैव व्यवहारनिमित्तौचित्यात्। न च शृङ्गारत्वेनैव चित्तद्रुति-जनकत्वं करुणशान्ताभ्यामपि चित्तद्रुतिजननेन व्यभिचारात्। न च

'आह्लादकत्वं माधुर्यं[3] शृङ्गारे द्रुतिकारणम्[4] ॥
करुणे[5] विप्रलम्भे तच्छान्ते चातिशयान्वितम्।

---

१. B reads ओजश्च
२. A reads शास्त्र —
३. A reads कारुण्यं
४. A reads चित्तद्रुति—
५. missing in A ;

दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थिति ॥

बीभत्सरौद्ररसयोस्तस्याधिक्यं क्रमेण चे"[1]ति कारिकास्वरसात्संयोग-शृङ्गारादतिशयितं माधुर्य्यम् । करुणे ततोऽप्यतिशयितम् । विप्रलम्भे ततोऽप्यतिशयितम् । शान्तवीरबीभत्सरौद्रेषु यथोत्तरमोजसोऽतिशय इत्यवगम्यते । तथा च चित्तद्रुतिरूपं कार्य्यमपि संयोगशृङ्गारादितो विलक्षणं विलक्षणमेव जायत इति विशेषकार्य्यकारणभावावश्यकत्वे किं सामान्यकारणतयेति वाच्यम् । चित्तद्रुतिरूपसामान्यधर्म्मावच्छिन्न-स्याकस्मिकत्वापत्त्या सामान्यतश्चित्तद्रुतिं प्रति मधुरत्वेन सम्भोगविप्रलम्भ-करुणशान्तानां कारणत्वाभ्युपगमस्यावश्यकत्वात् । अत एव रसवृत्त्येव मधुरत्वादिनीरसरचनायां चित्तद्रवस्य कार्य्यस्याभावात् । मधुरा रचनेति व्यवहारस्तु आकारोऽस्य शूर इतिवद् गौणः । रचनाया अपि परम्परया चित्तद्रवं प्रति प्रयोजकत्वात् । मधुरत्वादिकन्तु सम्भोगादौ गुणो[2], गुणे गुणानङ्गीकारपक्षे जातिर्वेत्यन्यदेतत् । माधुर्य्यादीनां शब्दार्थवृत्तित्वे गुणत्वमेव न स्यात् । रससाक्षात्सम्बद्धत्वे सति काव्यशोभाहेतुत्वस्य गुणत्व-रूपत्वात् । रसे साक्षादसम्बद्धस्यापि गुणत्वेऽलङ्कारस्यापि गुणत्वापत्तेः । रसे साक्षादसम्बद्धत्वे सति काव्यशोभाजनक एव ह्यलङ्कारः, अन्यथा गुणालङ्का-रविभाग एव न स्यात् । रससाक्षात्सम्बन्धासम्बन्धप्रयुक्त एव हि गुणालङ्कार-विभागः । काव्यशोभाहेतुत्वस्योभयत्राविशेषात् । रसवदलङ्कारोऽपि न रसे समवायवृत्त्या साक्षात्सम्बद्ध इति न तस्य गुणत्वापत्तिः । न च रसे साक्षात्स-म्बद्ध एवालङ्कारः उपमादीनामनलङ्कारत्वापत्तेरिति रसवृत्तिरेव माधुर्य्यादिको गुणस्तत्कार्यन्तु चित्तद्रुत्यादिकं कापिलादिमते परिणामिनश्चित्तस्य विलक्षण-परिणामस्वरूपम् । नैयायिकादिमते सुखविशेषस्वरूपं वा मग्नतास्वरूपं निर्व्विषयत्वं वेति संक्षेपः ।

---

१. *Kāvyaprakāśa*—VIII—68cd-70ab
२. Missing in C

श्रीमच्चित्रधरेणैषा कृता वीरतरङ्गिणी ।
अवगाह्य विमुञ्चन्तु तापं सन्तस्समामिमाम् ॥ ९४ ॥

इति श्रीचित्रधरकृता वीरतरङ्गिणी समाप्ता ।[1]

---

१. The Colophon of B reads as follows—
शाके वेदमहीधरालिचरणक्षोणी (१६७४) मिरालक्षिते
यः पाश्चात्यमृतेभकुम्भदलनस्फूर्जत्परं केसरी ।
श्रीमच्चित्रधरस्य तस्य सुधियः संकल्पिता सादरात्
श्रीमद्वीरतरङ्गिणी समलिखच्छ्रीटेकनाथो द्विजः ॥

An alphabetical index of verses found in the *Viratarangini*

(Figures in the margin refer to pages)

अद्यासौ विनिवर्ततां	३	किरीटिच्छद्दामं त्यज	६-७
अद्योद्दामललाम-	६	कुप्यत्वेष पितामहः	२
अपि बहलदहनजालं	१०	कृतार्थाश्च कृतार्थाश्च	३४
अपि वक्ति गिरांपतिः	१०	कृपयैव सदा	३५
अभ्युद्धृता वसुमती	२५	केचिद्धस्तुनि नो वाचि	२२
अयमानन्दकरोचिः	१९	केवलं दधति कर्त्तृवाचिनः	२२
अयमुदयति मुद्रा-	२४	क्लेयं वानरवीथिका	५
अवाञ्छितमुपायाति	१८	खञ्जस्य रुचिरेतु गञ्जनं	१३-१४
अस्मिन्नीषद्वलित-	२१	गाण्डीवी कनकशिला	३२
आक्षिपन्नरविन्दानि	३२	ग्राहेण ग्रहिणोग्र-	३
इदं हि शास्त्रमाहात्म्य-	३२	ग्रावृणानासि गिरेः	२३
इन्दुर्म्मूर्द्धनि शिवस्य	२९	च्युतसुमनसः कुन्दाः	१६
उच्चैरानमते सदैव	१	जम्भारातीभकुम्भोद्भव-	३५
उन्नमय्य सकरग्रह-	३१	तस्याजीवनिरस्तु	२१
उमा वधूर्भवान् दाता	२७	तान्येव यदि भूतानि	२७
एतत्कञ्चुकमङ्गुरीयक-	१६	तूणीराः शरजालकै-	८
एतन्मामकमत्र भावय	१३	तेऽमी पुण्यदृशोऽर्थिनः	७
एतानि निस्सहतनो-	२३	त्वद्वक्त्रेन्दुविलोकनाकुल-	३०-३१
एष प्राज्यतराज्य-	४	त्वमेवंसौन्दर्य्या स च	३०
एह्येहि वत्स ! रघुनन्दन !	२२-२३	दत्तेयं वसुधा बुधाय	५
करिकवलनशिष्टैः	२४	दर्भाङ्कुरेण चरणः	२८
कान्ते केलिकलाकुतूहलवति	१८-१९	दूरे तिष्ठतु मेदिनी	३

दूरे तिष्ठ मृदो वृकोदर	१	मौलौ धारय पुण्डरीकनमितं	२२
दूरे स्तादेष विस्तारित–	१-७	यदासेवनतः	१
दृप्तदुष्टतरदानवदर्प्प-	१५-१६,३४	ये ये धर्म्मधुरन्धराः	५
दृष्टिर्हे प्रतिवेशिनि	२९	यौष्माकीणालिकोद्यत्तुहिन–	१३
देवव्रते वाञ्छति दीर्घनिद्रां	२८	रचितां नवमालिकाप्रसूनै–	१५
नापृष्टा कमलालयापि	४	रसवदमृतं	२८
नीरन्ध्रे गमितवति	३२	रामोऽसौ न भवेद्यदि	८-९
पत्त्रिन्न त्रपसे	२	लीलालास्ये कदाचित्	१५
परिहरतु धरां फणिप्रवीरः	१०-११	वत्सास्त्वेह मनाक्	८
पात्रे पुरोवर्त्तिनि विश्वनाथे	२७	वरविहितालङ्कारा	१८
पृष्ठे तिष्ठतु वानरावलि-	२	वाचा विश्वासमाजः	१९
पृष्ठेषु शङ्खशकलच्छवि-	२६	विरहसमयहानप्रोल्लसच्चक्रवाके	१८
प्रणमत भवबन्ध-	३५	वेश विधाय लघुवेश्म	१७
प्रथममरुणच्छाय	३०	शुभे कोऽयं वृद्धो	३०
प्रागप्राप्तनिशुम्भ-	३६	शोभां पुष्यत्ययमभिनवः	३४
प्राणानामनिलेन	२६-२७	श्रीमच्चित्रधरेणेषा कृता	४०
भूरिभारभराक्रान्त	३१	श्रुत्वा यं सहसागतं	२०
भो भोः कुत्र धनुः	३-४	सद्यः कृत्तवपु-	५
भो भोः धर्म्मधनाः	४	सद्यः पुरीपरिसरेऽपि	२६
भ्रूभेदे सहसोद्गते	२५	सन्नद्धाः कुरवो	७
मूढाः किं कुरुतेह	६	सपदि विलयमेतु	१०
मूर्द्धव्रातोपहारस्फुटतर–	१२, १४	सौजन्याम्बुनिधे	२१
मैत्र्यादिचित्तपरिकर्म्म–	२९	स्फुरत्ताराकारा	१४
मोदेनाद्य कपोतपोतक–	६	स्वाधीना जगती	२

An alphabetical list of books and authors cited or referred to by Citradhara in his *Virataraṅgiṇī*

(Figures in the margin refer to pages)

जगन्नाथपण्डित	१०	राजस्तुतिपद्य	१३
(काव्य) प्रकाश	३३	वामन	१२
मम्मटभट्ट	३६	विनायकस्तव	१३, १५, १७
महाराज	१९, ३७	साहित्यदर्पण	९
रसतरङ्गिणी	९		